# विजयगीतम्

तदीयपाविल्येण जिग्मे-फुन्त्सोक-रिम्पोचे-वर्येण प्रणीतम्

भाष्यकारः खेन्पोसोदर्ग्यः



# विजयगीतम्

## अद्भुतदिव्यमृदङ्गनादः

तदीयपावित्र्येण जिग्मे-फुन्त्सोक-रिम्पोचे-वर्येण प्रणीतम्

भाष्यकारः खेन्पोसोदर्ग्यः

२०२१



तदीयपावित्र्येण जिग्मे-फुन्त्सोक-रिम्पोचे-वर्येण

# विषयानुक्रमणिका


**मूलपाठः** 3

**भाष्यम्** 7

1 ग्रन्थस्यास्य महत्त्वम् 8

2 ग्रन्थस्यास्य पूर्वपीठिका 10

3 आरम्भः 12

ग्रन्थस्यास्य शीर्षकः .................................................. 12

श्रद्धार्पणम् .............................................................. 14

4 मुख्यपाठः 19

वज्रयाननिषेवणाय प्रेरणा ............................................ 19

बोधिचित्तप्रबोधनाय प्रोत्साहनम् ..................................... 24

त्यागचित्तवृत्तेर्प्रबोधनाय प्रोत्साहनम् ................................ 30

शीलसंवलितचरित्रस्य विकासाय प्रोत्साहनम् ........................ 35

5 समाप्तिः 41

समर्पणम् ................................................................ 41

पुष्पिका.................................................................. 42

# विजयगीतम्

## अद्भुतदिव्यमृदङ्गनादः

## (मूलपाठः)

तदीयपावित्र्येण जिग्मे-फुन्त्सोक-रिम्पोचे-वर्येण प्रणीतम्[1]

[1] मूलपाठः *विजयगीतम्* इति खेम्पोसोदर्ग्यस्य चीनीभाषायाः संस्करणात् आंग्लभाषायामनूदितम्।

# मूलपाठः

## A1: अथारम्भः

### B1: शीर्षकः

विजयगीतम् - अद्भुतदिव्यमृदङ्गनादः

### B2: मङ्गलाचरणम्

ये सचेतनानां प्राणिनामभिपालकाः वर्तन्ते तेषां समेषामपि बुद्धानां प्रज्ञायाः मूर्त्तस्वरूपो यो बालरूपेणाविर्भूतोऽभ्यर्थितः सो मञ्जुघोषः । भवान् मम हृदये सर्वदा प्रतिष्ठताम् । अष्टदलकमलकिञ्जल्को मां तथानुगृह्णातु येन मम वचांसि सर्वेषां सचेतनानां प्राणिनां लाभाय स्युः ।

## A2: मुख्यपाठ्यम्

### B1: वज्रयाननिषेवणाय प्रेरणा

#### C1: अजेयवज्रयानाभ्यासस्य गुणाः

गभीरोज्ज्वलसंसिद्धिसंवलितानां मन्त्राणां श्रवणमात्रमेव जनं संसारमूलोच्छेदनाय प्रवर्तयति। भवन्तः सर्वे विमुक्तये एषां मन्त्राणां सारं षाण्मासिकेनाभ्यासेन स्वहृदये उत्कीर्णं कुर्युः ।

#### C2: वज्रयानाभ्यासस्योपपत्तिसमयाः

ये हि दैववन्तस्त एव परमोपदेशं प्रत्यनुभवन्ति। ते नूनमेव नैकेभ्यः युगेभ्यः लब्धजन्मभ्यः गुणाः सञ्चयन्तस्सन्ति। ते हि बुद्धसमन्तभद्र इव प्रबोधनस्यार्हताः दधति। धर्मसुहृदः! भवन्तस्सर्वे स्वात्मनैव बद्धानन्दास्स्युः ।

## B2: बोधिचित्तप्रबोधनाय प्रोत्साहनम्

### C1: बोधिचित्तप्रबोधनहेतवः

भयसम्पृक्ते संसारसागरे निमग्नानां सर्वेषां सचेतनानां निमित्तम्,
तेभ्यश्च बुद्धत्वरूपी अजस्रानन्दावाप्तये साहाय्यं प्रदातुम्,
भवद्भिरन्यानुपकर्तुं दायित्वनिर्वहणं करणीयम्,
अथ च स्वात्मानुरागरूपी विषसम्पृक्तभोजनं हातव्यम् ।

### C2: बोधिचित्तप्रबोधनस्य लाभाः

इदं हि अधोलोकस्य द्वारमवरुणद्धि,
ऊर्ध्वलोकस्यानन्दानधिगन्तुमनुमनुते,
फलतो बोधितचित्तप्रबोधानं युष्मान् संसाराच्चरममुक्तिम्प्रति नयति,
युष्माभिरक्षिप्तचित्तो भूत्वा अपरिहार्योपदेशोऽयमभ्यसनीयः।

## B3: त्यागचित्तवृत्तेर्प्रबोधनाय प्रोत्साहनम्

### C1: नियमपरिपालनस्य गुणाः

संसारस्य भव्यायोजनानाङ्कृते तृष्णायाः लेशमात्रमपि चिन्तनं न स्यात् ।
पवित्रनियमाः परिपालनीयाः,
इमे नियमा एव संसारस्य प्रकृष्टालङ्करणानि सन्ति
एभ्यो नियमेभ्य एव मनुष्यदेवगणाश्च सर्वश्रेष्ठार्पणं विदधति ।

### C2: नियमभङ्गस्य परिणामः

यतस्सर्वेऽप्यैकान्तिकात्यन्तिकानन्दाः शुद्धनियमपरिपालनास्यैव परिणामाः सन्ति,
तस्मात् नियमानां भङ्गः जनानामधोलोके पुनर्जन्म प्रति नयति ।
भ्रान्तिं  परित्यज्य युष्माभिः समुचितविकल्पश्चेतव्यः।

## B4: शीलसंवलितचरित्रस्य विकासाय प्रोत्साहनम्

### C1: शीलसंवलितचरित्रस्य विकासहेतवः

सुहृद्भिस्सह वचसि कर्मणि चैक्येनोपक्रमणीयम्,
शीलनिष्ठत्वेन दयासंवलितत्वेन च जनैर्भाव्यम्,
स्वात्मानं दीर्घकालावधिपर्यन्तमुपकर्तुम् ,
सारभूतसंसूचनमस्ति यत् प्रवर्तमाने क्षणेऽन्ये उपकरणीयाः ।

### C2: शीलसंवलितचरित्रसंधारणस्य गुणाः

इदं हि सच्चरित्रं वर्तते सज्जनतायाः विशुद्धमानदण्डभूतम् ,
अथ चेदमेव वर्तते भूतभविष्यवर्तमनानां बुद्धानां बुद्धत्वाप्तेर्साधनम्,
मम सर्वे शिष्याः! युष्माभिश्चतुर्विधाकर्षणधर्माणां[2] सारो न विस्मर्तव्यः ।

# A3: समाप्तिः

## B1: समर्पणम्

अहं सर्वेभ्यस्सचेतनप्राणिभ्यो धर्मनिबन्धनमिदं समर्पये,
ते च सचेतनप्राणिनः संसारगर्तस्य पारङ्गच्छेयुः ।
मे प्रियशिष्याः प्रहृष्टास्स्युः,
अथ च परमानन्दस्य पवित्रप्रतीच्यां भुवि पुनर्जन्म लभेयुः ।

## B2: गीतस्यास्य प्रणयनस्य पुष्पिका

*तिब्बतीपञ्चाङ्गस्य सप्तदशतमे चक्रे आग्नेयमूषकवर्षे गुरुशिष्यैः बाह्याभ्यन्तरप्रच्छन्नावरोधाः प्रत्यादिष्टाः । तस्मिन् पवित्रेऽह्नि नग्वंग-लोड्रो-त्सुङ्ग्मे[3] इत्यमुना महानुभावेन विजयदिवसः आमानितः अथ च प्रायः पञ्चसहस्रमठजनेषु सद्योविनिर्मितं गीतमिदं प्रस्तुतम् । साधु!*

---

[2] एते चत्वारस्तु प्रस्तुते भाष्ये वर्ण्यन्ते ।

[3] एतत्तु जिग्मे-फुन्त्सोक्-रिन्पोचे-वर्यस्य अपरं नाम वर्तते ।

# विजयगीतमधिकृत्य कृतं भाष्यम्

खेन्पोसोदर्ग्येण कृतम्

# ग्रन्थस्यास्य महत्त्वम्

तदीयपावित्र्यस्य जिग्मे-फुन्त्सोक-रिम्पोचेवर्यस्य जीवनस्य धार्मिकगतिविधयः षड्सु भागेषु विभज्यन्ते। प्रत्येकं भागः सारभूतोपदेशैरङ्कितोऽस्ति। एते षड्भागा इमे सन्ति- *उपदेशस्य प्रभातीयारुणिमा, मम हार्दिकपरामर्शस्य बिन्दवः, परामर्शामृतबिन्दवः, विजयगीतम्, चतुर्णाम् यानानामुपदेशः, यत्सर्वं प्रकटत्यवस्थितञ्च तत्शिक्षावधौ आकर्षणम्।* निर्वाणप्राप्तेः पूर्वं तदीयपावित्र्येण उपर्युक्तग्रन्थेभ्योऽतिरिक्ताः केचिदुपदेशा अपि प्रदत्ताः।

एते ग्रन्थाः कतिपयवर्षं यावत् शिक्षाभ्यासस्य परिणामभूताः सामान्यशोधप्रबन्धाः न सन्ति अपितु तदीयपावित्र्येण स्वाध्यायानुशीलनाभ्यासैः जीवने समर्जितस्य ज्ञानस्य सारभूताः सन्ति। बुद्धशाक्यमुनेरारभ्य गुरुपद्मसम्भवं यावत्प्रत्येकं जन्मनि तस्य महात्मत्वं बुद्धत्वञ्च, तेन सम्प्राप्तानुभूत्या, तज्जीवनचरितेन,तदुत्कृष्टगुणैश्च सिद्धम्। न केवलं तेन प्राक्तनजन्मसु शुभकर्माणि सञ्चितानि अपितु अस्मिन् जन्मन्यपि आ पञ्च वर्षादारभ्य षष्टिवर्षोत्तरार्धं यावत् बुद्धस्योपदेशे अवधानं कृत्वा स्वाध्यायः, ध्यानम्, अभ्यासश्च कृतः। तदीयपवित्र्येण स्वीयं सकलमपि जीवनं सचेतानानां लाभाय बौद्धसिद्धान्तेभ्यश्च समर्पितम् अथ च तस्य गभीरप्रज्ञया वचनान्युपदेशाश्च निःसृताः ये हि निश्चप्रचं महार्हाः वर्तन्ते।

षण्णवत्यधिकैकोनविंशतिसहस्रतमाब्दे सेप्टेम्बरमासस्य एकविंशतिः दिनाङ्के यदा तदीयपवित्र्येण, तस्य शिष्यैश्च सर्वे बाह्याभ्यन्तरगुप्तविघ्नाः निरस्ताः, तथाभूते तिब्बतीपञ्चाङ्गस्य पवित्रे विजयदिवसे तदीयपवित्र्येण इदं वज्रद्विखण्डात्मकं सद्योविचिन्तितं विजयगीतं पञ्चसहस्रमठजनानां समक्षं प्रस्तुतम् ।

खेन्पो सोदर्ग्ये वर्येण एकस्मिन् स्वीयोपदेशे उक्तं यत्-“अस्य विजयगीतस्य अध्ययनानन्तरं बुद्धिमन्तो जना एव वेदिष्यन्ति यत् कियद् प्रकृष्टं गीतमिदम्”। आदौ यदा

तदीयपवित्र्येण वयमुपदिष्टाः तदा अस्माभिः तेषामुपदेशानां मूल्यं नावगतम् परं धर्मस्य निरन्तरचिन्तनेन विविधधार्मिकसिद्धान्तानां परिचयेन च अस्माभिरनुभूतं यत् तदीयपावित्र्यवर्यः हि मनुष्येषु वर्ततेऽद्वितीयः।

एतद्धि सत्यं यत् यद्यपि महात्मना बुद्धेन चतुरशीतिः सस्त्रोपदेशाः प्रदत्ताः परं तेषु उपदेशेषु एकस्मिन् जन्मनि सामर्थ्यमधिगन्तुं न शक्यते। तथापि तदीयपवित्र्येण स्वीयाभ्यासानुभूत्या एते उपदेशाः सारभूतसंसूचनरूपेण उपसंहृताः। अस्माभिः एते उपदेशाः रक्षणीयाः एवञ्च एतेषां गभीरार्थश्चिन्तनीयः।

सैद्धान्तिकरीत्या उच्यते यत् धर्मचारिभिः सूत्राणि तन्त्राणि इत्युभयमपि च अध्येतव्यानि, यथा- महायानस्य पञ्चसन्धयः । परं जीवनमस्ति स्वल्पमअथ च एतद्धि ज्ञातुमशक्यं यत् कियत् कालं यावत् कश्चन जीविष्यति। केषुचित् क्षणेषु भूयांसि परिवर्तनानि शक्यानि एवञ्च न किमपि निश्चितमस्ति। तस्मादेव लघुकायस्यास्य सारभूतसंसूचनात्मकग्रन्थस्य अध्ययनं पाठकेभ्यो लाभप्रदः स्यादन्यथा ते संसारात् प्रयाणकाले यथापेक्षं सज्जाः न स्युः।

तदीयपवित्र्येण स्वीयशिष्यपरम्परायाः अनुयायिनो धार्मिकग्रन्थानां स्वाध्यायात् अथ वा शिक्षणात् प्रागस्य विजयगीतस्य उच्चारणाय शिक्षणाय वाध्यर्थिताः येन हि अध्ययानावधौ यदि काः अपि बाधाः स्युश्चेत् ताः निरस्ताः स्युः। एवमेव यदि कश्चन धर्मानुचरणमभिकाङ्क्षति चेत् अस्य गीतस्य पाठः तस्य आकाङ्क्षाः साफल्यं प्रति नेष्यति बाधाभ्यश्च मोचयिष्यति। एतदतिरिक्तं अस्य ग्रन्थस्य पाठमात्रेणैव किं वा सहस्थापनेनैव धर्माभ्यासावधौ धर्माध्ययनावधौ वा यदि कापि बाधा भवेच्चेत् सा अनुकूलतां प्राप्स्यति। तस्मात् तदीयपवित्र्येण पौनःपुन्येन अध्यर्थितं यदि कोऽपि जनः तच्छरणं आगच्छति किं वा तस्मिन् विश्वसीति तर्हि तेन हि अदः विजयगीतं स्मर्तव्यं एवञ्चास्य गभीरार्थो ग्रहीतव्यः।

# ग्रन्थस्यास्य पूर्वपीठिका

पञ्चनवत्यधिकैकोनविंशतिसहस्रतमाब्दस्य सेप्टेम्बर मासे तदीयपावित्र्येण जिग्मे-फुन्सोक-रिम्पोचे -वर्येण ताईवानदेशं गमनस्य अथ च नेपालदेशे पद्मसम्भवस्य गुहायाममितायुषः बुद्धस्य शरणमधिगन्तुं योजना विनिर्मिता परं यदा सः चेङ्गडुस्थले प्राप्तवान् तदा सः स्वीययात्राज्ञापत्रमालक्ष्य समस्याः अनुभूतवान् तस्य शारीरिकस्वास्थ्यमपि ह्रासङ्गतः। चेङ्गडुस्थः औषधालयः तस्य रुग्णतायाः कारणमवगन्तुमसमर्थोऽभवत्। फलस्वरूपं सः प्रायः पञ्चमासं यावत् चेङ्गडुस्थले समाधौ स्थितवान्। अस्यामवधौ तेन भोजनवेलां विहाय नैकोऽपि शब्दः उक्तः।

एकस्यां रात्रौ तदीयपावित्र्येण समादरणीयोऽतिशः, समादरणीयः ड्रोम्तोन्पा, जु मिफं रिन्पोचे, लामा लोड्रो[4] वर्याश्च स्वप्ने दृष्टाः। समादरणीयेन अतिशेन तदीयपावित्र्ये स्वीयकरुणामयी दृष्टिर्प्रक्षिप्ता। समादरणीयः ड्रोम्तोन्पा उक्तवान्- "वयमत्र सम्प्राप्ताः यतो हि समादरणीयः अतिशः भवद्विषये चिन्तितोऽस्ति । महोदधेः एताः महोर्मयः मार्चमासस्य दशमे दिवसे उपशमिष्यन्ति, किं त्वं जानासि यदनेन किमुपलक्ष्यते"? (एतेन तस्य तात्पर्यं यत्तदीयपावित्र्यस्य रोगः तद्दिनं यावत् उपशमिष्यति) तदनु समादरणीयः अतिशः समादरणीयः ड्रोम्तोन्पा च उपरतौ ।

द्युतिमान् तिष्ठन्नवस्थितः सः जु मिफं रिम्पोचे वर्यः बलेन बाह्याभ्यन्तरगुप्तविघ्नान्नपाकर्तुं, सम्भ्रमेण विभेदेन च समुत्पन्नानि पापानि जेतुं पद्मसम्भवमुग्ररीत्या बलेन प्रार्थितवान्। तदनु प्रकाशपुञ्जे परिणतः सः उपरतः ।

कृपान्वितेन लामा-लोड्रो-वर्येण परामर्शः प्रदत्तः यत्- "त्वया महत्सिद्धत्वस्य भास्वदवस्थायां स्वरूपस्य शून्यतायाश्च महद्योगे च उषितव्यः । एतया गभीरैकाग्रतया त्वया

---

[4] असौ हि जिग्मे-फुन्त्सोक्-रिन्पोचे-वर्यस्य गुरुषु अन्यतमः आसीत्।

सचेतनानि बोधिचित्तेन उपकर्तव्यानि, अन्येषां दुःखानि च स्वीयसुखैः विनिमेयानि । एतेन अननुकूलपरिस्थतयः शून्यतां यास्यन्ति । तेन अन्येऽपि उपदेशाः प्रदत्ताः तदनु सः प्राकाशस्वरूपोऽभवत् ।

अस्य स्वप्नस्यानन्तरं तदीयपावित्र्येण शनैः-शनैः रोगान्नीरोगतां प्रति प्रस्थितम् एवञ्च समादरणीयेन ड्रोम्तोन्पा वर्येण यथा कल्पितं तथैव तदीयपावित्र्यवर्यः मार्चमासस्य दशमदिनं यावत् सम्पूर्णरीत्या रोगमुक्तोऽभवत् । तदीयपावित्र्यस्य लरुङ्ग गरस्थले प्रत्यावर्तने सति तदीयशिष्यैः तस्य यथारीतिः भव्यं स्वागतं विहितम् । सः सर्वेषां शिष्याणां चतुर्विधायां सभायां सद्योविनिर्मितं विजयगीतं प्रस्तुतवान् । तस्मिन् क्षणे सर्वेषां प्रसन्नता अवर्णनीया आसीत्। महद्विजयं सूचयन् तदीयपावित्र्यवर्यः हान्शिष्याणां सभां *विजयी-सब्दुए-मारालेण्ड्* इत्यभिधानं प्रदत्तवान् ।

# अथारम्भः

शीर्षकः

श्रद्धार्पणम्

## B1: शीर्षकः

**विजयगीतम् : अद्भुतदिव्यमृदङ्गनादः**

### a. शीर्षकस्यार्थः

शीर्षके *विजय*-पदस्य अभिप्रायोऽस्ति यत् गुरूणां त्रिरत्नस्य च आशीर्भिः बाह्याभ्यन्तरगुप्तविघ्नान्निपाकृत्य सम्पूर्णविजयस्य प्राप्तिः। *गीत*-पदस्य अभिप्रायोऽस्ति *दोहा* इति, एतद्धि सद्योविनिर्मितं गीतमस्ति यद्धि नियतानुभूत्या प्रबुद्धात्मना गीतम् । दिव्यमृदङ्गः स्वर्गस्थः कश्चन मृदङ्गो वर्तते यस्य प्रतीतिः दिव्यजनानां महद्भिर्गुणैः शक्यते ।

*विजयगीतं* हि *अद्भुतदिव्यमृदङ्गनादः* इति रूपकेण व्याख्यायितं यतो हि अस्मिन् मृदङ्गे नैसर्गिकध्वनिरस्ति यस्याभिप्रायोऽस्ति यत्, सर्वे दिव्यजनाः! युष्माभिर्न भेतव्यम् (यथा- यदा दिव्यजनाः असुरैः सह युध्यमानाः आसन् तदा अद्भुतमृदङ्गस्य दिव्यनादेन तेऽसुरान् पराजेतुं समर्थाः बभूवुः)। तस्माच्छीर्षकोऽयं *विजयगीतं* हि *अद्भुतदिव्यमृदङ्गनादेन* सह सादृश्यं भजते। अयं संक्षिप्तग्रन्थः सकलमपि सूत्रयानस्य तन्त्रयानस्य च उपदेशानां, तदीयपावित्र्यस्य 'आजीवनमभ्यास्य' च सारभूतसंसूचनमस्ति।

### b. मार्गस्य चत्वारो पक्षाः

*मार्गस्य त्रयो पक्षाः* इत्यस्मिन् ग्रन्थे लामा त्सोङ्खापा वर्येण त्रयो मार्गाः चर्चिताः, ते सन्ति- त्यागः, बोधिचित्तम्,अद्वैतात्मिका बुद्धिश्च।

यद्यपि, अस्मिन् संक्षिप्तग्रन्थे तदीयपावित्र्येण संक्षिप्तरूपेण निखिलोऽपि प्रबोधमार्गश्चचतुर्षु प्रमुखपक्षेषु *गुणान्वितं व्यक्तित्वम्* इत्यतिरिक्तेन पक्षेण सह उपसंहृतः। अपि च अद्वैतात्मिका बुद्धिरुभयोरपि महायानवज्रयानमार्गयोः व्याकर्तुं शक्यते। विजयगीतेऽस्मिन् अद्वैतात्मिका बुद्धिरतियोगेन अथवा ड्झोग्चेन इत्यस्य परिप्रेक्ष्ये वर्णितास्ति। अयमतियोगः महायानस्य शून्यवादसिद्धान्ते आधृतस्य वज्रयानाभ्यासस्य परमस्तरः वर्तते।

आध्यात्मिकाभ्यासकर्तृभ्योऽस्य अतियोगस्य अनुभूतिः परमप्रबोधनमस्ति। का खलु पूर्वयोग्यता एतादृशे परमप्रबोधनावाप्तये? तद्धि बोधिचित्तम्। यथा शान्तिदेवेन उक्तं यत् कश्चन जनः महद्गुणैः सम्पृक्तः सन्नपि ऋते बोधिचित्तात् परमप्रबोधनमवाप्तुं नार्हति। तर्हि कथं कस्यचिन्मनसि बोधिचित्तोद्भवः सम्भवेत्? एतद्धि तदैव शक्यं यदा त्यागसम्पृक्तश्चित्तं गुणान्विते व्यक्तित्वे आधृतं स्यात्। तर्हि अभ्यासस्य एषः क्रमः स्यात्- एकं गुणान्वितं व्यक्तित्वम्, सांसारिकबन्धानानां परित्यागे शक्तं त्यागवृत्तिसंवलितं चित्तम्, सर्वेषां सचेतसां बुद्धत्वावाप्तये बोधिचित्तस्य आकाङ्क्षा अथ च एकस्मिन्नेव जीवने प्रबोधनावाप्तये अतियोगस्य अभ्यासः। एते चत्वारः पक्षाः अस्मिन् *विजयगीते* उपसंहृताः।

## B2: श्रद्धार्पणम्

**ये सचेतनानां प्राणिनामभिपालकाः वर्तन्ते तेषां समेषामपि बुद्धानां प्रज्ञायाः मूर्त्तस्वरूपो यो बालरूपेणाविर्भूतोऽभ्यर्थितः सो मञ्जुघोषः । भवान् मम हृदये सर्वदा प्रतिष्ठताम् । अष्टदलकमलकिञ्जल्को मां तथानुगृह्णातु येन मम वचांसि सर्वेषां सचेतनानां प्राणिनां लाभाय स्युः ।**

### a. मञ्जुश्रियै प्राञ्जलभक्त्यर्पणम्

तदीयपावित्र्येण जिग्मे-फुन्त्सोक्-रिम्पोचेवर्येण अस्मिन् पद्ये उक्तं यत् “जगतः दशसु दिक्षु विद्यमानाः सर्वेऽपि बुद्धाः समेषामपि सचेतनानां प्राणिनां संरक्षकाः सन्ति। दशसु दिशासु विद्यमानानां बुद्धानां प्रज्ञा समष्टिरूपेण मञ्जुश्रियां मूर्तिमती वर्तते। सचेतनानां हिताय यः बालरूपेणाविर्भूतः। अहम्प्रार्थये यत् मञ्जुश्रीः मम अष्टदलकमलहृदयं सुभगोज्ज्वलसूर्यरश्मिभिर्भरतु अथ च तन्मे हृत्कमलकिञ्जल्केऽजस्रं निवसतु। अहम्प्रार्थये यत् मञ्जुश्रियाः करुणायाः शक्त्या मम वचांसि जगत्यस्मिन् सर्वेषां सचेतनानां प्राणिनां सार्वभौमिकहिताय भवेयुः”।

अत्र अष्टदलकमलस्य हृदयस्य च सादृश्यं प्रतिपादितम्, वज्रयाने यस्य नैके बाह्याभ्यन्तरगुप्तार्थाः सन्ति ते हि ते ह्यत्र विस्तरेण न चर्चिष्यन्ते।

एतद्धि मञ्जुश्रियै वर्तते श्रद्धार्पणम् । तदीयपावित्र्यवर्यः जिग्मे-फुन्त्सोक्-रिम्पोचेवर्यः वुटै गिरौ व्यक्तिगतरूपेण मञ्जुश्रियाः समागमानन्तरं मञ्जुश्रियं स्वस्य प्रमुखदेवत्वेनानुमनुते । यदा कदापि सः प्रकरणं रचयितुं समुद्यतो भवति स्म तदा आदौ सः मञ्जुश्रियै श्रद्धार्पणं करोति स्म । एतेन तस्य मञ्जुश्रियामगाधश्रद्धा प्रदर्श्यते ।

तदीयपावित्र्यस्य मञ्जुश्रिया सह आबाल्यकालात् गाढसम्बन्धोऽवर्तत। तस्य आत्मकथानुसारं यदा सः जनिमलभत तदा सद्योजातः सोऽविलम्बेनोच्चस्वरेण मञ्जुश्रियः मन्त्रस्योच्चारणमकरोत्, सोऽस्ति- *ओ३म् अरपचना धीः ।* षड्वर्षीयः सः ‘मञ्जुश्रियः वाक्सिंहः’ ग्रन्थस्यास्य एकां प्रतिं प्रस्तरखण्डेषु लब्धवानथ च अन्ते एकं पद्यं दृष्टवान् तस्मिन्

लिखितमासीत् यन्नवनवतिवर्षीयः कश्चन भारतीयो जनः एकाह्नोऽभ्यासेनैव मञ्जुश्रियः साक्षात्कारं लब्ध्वा बुद्धत्वं प्राप्तवान्।

तदीयपावित्र्येण विचिन्तितं यत् "यदि तादृशः कश्चन वृद्धः एकाह्नोऽभ्यासेनैव मञ्जुश्रियं प्राप्तुमर्हति चेत् ऋते कस्याः अपि बाधायाः बाल्यकालेऽवस्थितोऽहमभ्यासक्षमो भवेयं बुद्धत्वञ्च प्राप्नुयाम्" ।

सोऽतीव पुलकितोऽभवत् अथ च कतिपयदिवसं यावत् पूर्णैकाग्रतया अभ्यासमकरोत् । फलस्वरूपेण सः सिद्धेः बहूनि चिह्नानि अनुभूतवान् एवञ्च नैसर्गिकरूपेण सूत्रतन्त्रयोः सर्वेषु ग्रन्थेषु टीकासु च प्रावीण्यं प्राप्तवान्।

तदीयपावित्र्येण बहुधा संसूचितं यदभ्यासकर्तृभिः अजस्रं मञ्जुश्रियः मन्त्रः उच्चरितव्यः एवञ्च मञ्जुश्रियः प्रार्थना कर्तव्यो यतो हि अन्यबुद्धापेक्षया मन्जुश्रियः आशींषि वर्तन्ते विशिष्टानि। वयं सामान्यजनाः निर्णेतुं न शक्नुमः यत् शाक्यमुनेर्बुद्धस्य आशींषि बलवत्तराणि आहोस्वित् बोधिसत्त्वमञ्जुश्रियः , किन्तु सम्बद्धसूत्रानुसारं तर्कसङ्गतं निर्णयं कर्तुं न पारयामः यतो हि सम्बद्धसूत्रेषु एतद्वर्तते व्याख्यायितम्।

धरातले मञ्जुश्रीः बोधिसत्त्वमात्रेण प्रकटितः परं यथा सूत्रेषु वर्णितं तदनुसारं सः बहुकालपूर्वं बुद्धत्वमवाप्नोत् एवञ्च सः जगतः दशसु दिक्षु विद्यमानानां सर्वेषां बुद्धबोधिसत्त्वानां समेकितप्रज्ञायाः मूर्त्तस्वरूपोऽथ च सः समेषां बुद्धानां पितृत्वेनामानितः। तेन नैके सचेतनाः बोधिचित्तप्रबोधनेन बुद्धत्वावाप्तये प्रचोदिताः। अत एव तस्याशिषां शक्तिः अद्भुता अकल्पनीया च वर्तते।

प्रत्येकं जनः आशीर्भिरुपकृतं भवितुमर्हति। तदवाप्तये एका एव वर्तते कुञ्जिका, सास्ति कश्चन मञ्जुश्रियां विशुद्धरूपेण विश्वसीति न वा। यथा खेन्पो सोदर्ग्यवर्येण स्वीयोपदेशे उक्तम्- यदा सः वुटै गिरौ[5] गतवान् सः सततं विश्वसन्नासीद्यत्तस्मै व्यक्तिगतरूपेण मञ्जुश्रियः साक्षात्कारः भविष्यति , यद्यप्यन्ते सो मञ्जुश्रियं न दृष्टवान् तथापि तेन किञ्चिदाशीर्लब्धं येन सः धर्मग्रन्थानां कतिपयवारमध्ययनानन्तरमेव तेषां ग्रन्थानामुच्चारणे स्मरणे च

---

[5] वुटै पर्वतः किं वा वुटै शान् इति मध्यचीनस्थः प्रदेशः वर्तते, यद्धि मञ्जुश्रियः पवित्रपीठमस्ति।

समर्थोऽभवत्। तस्मात् खेन्पो सोदर्ग्यवर्येण उपसंहृतं यत् विभिन्नजनानां श्रद्धायाः स्तरः पृथक्-पृथग् भवितुमर्हति किन्तु यावत्ते मञ्जुश्रियः आशीर्भिः सम्पृक्ताः सन्ति तावत् सूत्रतन्त्रयोः लिखिताः ग्रन्थाः टीकाश्च अर्थसहितं तेषां मनःसु प्रकटीभविष्यन्ति। यदि कश्चन अजस्रं मञ्जुश्रियं प्रार्थयते चेदुत्तरोत्तरं जन्मसु तस्मै मेधा प्राप्तिर्भविष्यति । अथ च समेषां बुद्धानां आशींषि तस्य तस्याः वा मनसः प्रवाहे समाहिताः संक्रान्ताश्च भवितुमर्हन्ति ।

### b. मञ्जुश्रियः महती कथा[6]

एकदा यदा बुद्धः गृध्रकूटे धर्ममुपदिशन्नासीत् तदा पर्वतस्योपत्यकायां स्थितायां नगर्यां *स्वर्णरश्मिः* नाम्नी वाराङ्गना आसीत् । सा खलु निसर्गसुन्दरी मनमोहिनी चासीत् । परं ततोऽपि विशिष्टं आसीद्यत्तस्याः समग्रमपि शरीरं स्वर्णाभया अदीव्यत्। तस्मात् कारणात् भूपतिः , मन्त्रिणोऽथ च अन्ये नगरस्थाः पुरुषाः तस्यां मोहिताः अभवन्। यद्यपि सा निम्नवर्णा वाराङ्गनैव आसीत् तथापि सा विशालजनसम्मर्देन परिवृता आसीत्।

एकदा सा कस्यापि वणिक्पुत्रेण सह वस्तूनि क्रेतुम् आपणं गतवती। ततः तौ मनोरञ्जकोद्याने आमोदप्रमोदाय कल्पितवन्तौ। तस्मिन्नेव पथि मञ्जुश्रीः रूपवतः युवकस्य स्वरूपं धृतवान् यतो हि सः विजानन्नासीद्यत् स्वर्णरश्म्याः प्रबोधनाय एताः हि वर्तन्तेऽनुकूलपरिस्थितयः। तस्य सकलमपि शरीरमप्रतिमकान्त्या अदीव्यत्। मनमोहिनी *स्वर्णरश्मिः* दृष्टवती यत् यावत् सा मञ्जुश्रियः कान्त्याः सम्मुखं स्थितवती तावत्तस्य कान्त्या तस्याः कान्तिरतिक्रान्ता अथ च तस्याः आत्मनः कान्तिर्म्लानतां गतवती।

सा मञ्जुश्रियः कान्तिमद्भ्यो वस्त्रेभ्योऽलुभत् एवञ्च सत्वरं यस्मिन् याने सा वणिक्पुत्रेण सह गच्छन्त्यासीत् तस्मात् यानादवरुह्य वणिक्पुत्रं च त्यजन्ती तद् द्युतिमन्तं युवकं स्वस्य सौन्दर्येण मोहितुमयतत ।

तस्मिन् क्षणे मञ्जुश्रीः सशक्तं वैश्रवणं तस्यै सुवर्णरश्म्यै परामर्शाय आदिष्टवानथ च तेन वैश्रवणेन सा उक्ता यत् त्वया तस्मै यूने स्वीयलोलुपता नोद्भाव्या यतो हि सः बोधिसत्त्वः

[6] अतिरिक्तसूचनायै धर्मरक्षावर्येण अनूदितं *मञ्जुश्रीविक्रीडितसूत्रम्* अवलोक्यताम्, एतद्धि प्रतीची जिन् राजवंशे संस्कृतभाषायाः चीनभाषायामनूदितम्।

मञ्जुश्रीः वर्तते यो हि समेषां बुद्धानां मेधायाः समेकितस्वरूपोऽस्ति। सः तव सकलानापि मनोरथान् सफलीकर्तुं पारयति । त्वं किं वाञ्छसि? सा अवोचत् यत् “न किमप्यन्यदहं काङ्क्षे, अहं तु तस्य यूनः मनोहराणि वस्त्राण्येव कामये” । मञ्जुश्रिया प्रत्युत्तरितं यत् यदि त्वं बोधिद्वारं प्रविष्टुमर्हति चेदहं तुभ्यं मम वस्त्राणि दास्ये । एतेन तया न किमपि ज्ञातम्, तदनु मञ्जुश्रीः विस्तरेण तस्यै उपदिष्टवान् ।

गृध्रकूटे मञ्जुश्रियः उपदेशावधौ शाक्यमुनिर्बुद्धः सघोषं तं प्रशंसन्नुक्तवान् यत् “भद्रङ्कृतम्” अथ च स घोषः असंख्यनपि ब्रह्माण्डानान्दोलितवान् । मञ्जुश्रियः सेवकैः बुद्धः पृष्टः यत् कथं भवता एतदुक्तम्? बुद्धेन प्रत्युत्तरितं यत् “बोधिसत्त्वः मञ्जुश्रीः करुणया मेधया च संवलितः बौद्धधर्मस्योपदेशः तां वाराङ्गनां प्रबोधयितुं करोति यदि भवन्तः श्रोतुमिच्छुकाः सन्ति चेद्भवद्भिर्गन्तुं शक्यते” । तस्मान्नैके बुद्धशिष्याः मञ्जुश्रियः आवासमगच्छन् । अथ च मञ्जुश्रियः उपदेशं श्रुत्वा केचन शिष्याः धर्मचक्षुषं समर्जितवन्तः येन हि ते सत्यं विशुद्धरूपेण अबाधितगत्या च द्रष्टुं समर्थाः अभवन्, केचन शिष्याः निर्वाणभूतस्य सत्यस्य बोधं लब्धवन्तः, केचन शिष्याः अप्रतिगामिनं भोगं प्राप्तवन्तः, सहस्रशः सचेतनाः तदनुरूपं फलञ्च प्राप्तवन्तः ।

निसर्गसुन्दर्यै स्वर्णरश्म्यै अपि दृढावबोधोऽभवत् यत्कस्यापि वस्तुनः आत्मप्रकृतिर्नास्ति । सा निश्चयेन मञ्जुश्रियमनुगन्तुमिच्छुः सती बौद्धभिक्षुणीत्वेन जीवितुमिच्छति स्म। न खलु संन्यासमार्गे शिरोमुण्डनमावश्यकं किन्तु परेषां लाभाय स्वार्थपरित्यागोऽथ च बौद्धधर्मस्य तत्परतया अनुपालनमावश्यकमस्ति । मञ्जुश्रिया सा वणिक्पुत्रेण सह तस्य यानेन गन्तुमादिष्टा ।

यदा निसर्गसुन्दरी वणिक्पुत्रश्च मनोरञ्जकोद्यानं सम्प्राप्तवन्तौ तदा सा स्वर्णरश्मिः तस्याङ्के मृत्युमुपगता अथ च एतेन ताभ्यां क्षणिकत्वमनुभूतम् । आदौ सः महत्खिन्नोऽभवत् परं यदा तस्याः शरीरमुत्तरोत्तरं क्षयङ्गतं मुखाक्षिश्रोतृभ्यः रुधिरं पूयञ्च निःसृतं , शरीरञ्च समग्रतया दुर्गन्धेन समन्वितं तदा सः वणिक्पुत्रः बिभ्यन् शाक्यमुनेः बुद्धस्य संरक्षणं प्राप्तुं गृध्रकूटपर्यन्तं सत्वरमधावत्। शाक्यमुनिना बुद्धेन तस्मै धर्मोपदेशः प्रदत्तः तेन सः निर्वाणभूतसत्यस्य समग्रबोधः लब्धवान् । तदनु बुद्धेन कल्पितं यत् “यतो हि

बोधिसत्त्वमञ्जुश्रिया स्वर्णरश्मिः प्रेरिता तस्मात्सा भविष्यकाले बौद्धभूमौ बुद्धत्वं प्राप्स्यति । सा दिव्यज्योतिर्बुद्ध इति नाम्ना अभिधास्यतेऽथ च सः वणिक्पुत्रः बोधिसत्वं भूत्वा पुण्यप्रकाश इति नाम्नः बोधिसत्त्वः भविष्यति"।

सः वणिक्पुत्रः व्याकुलोऽभवत् , "कथं बोधिसत्त्वमञ्जुश्रियः शिष्या स्वर्णरश्मिः बुद्धत्वं प्राप्स्यति किन्तु अहं शाक्यमुनेः बुद्धस्य शिष्यः सन्नपि केवलं बोधिसत्त्वो भविष्यामि"? सः एतज्ज्ञातुमसमर्थोऽभवत् । बुद्धः अवदत् "अचिन्त्याः खलु बोधिसत्त्वमञ्जुश्रियः गुणाः । यथा भूतकालेऽसंख्यबुद्धैः मञ्जुश्रियः समक्षं बोधिचित्तप्रबोधनाय इदम्प्रथमतया सङ्कल्पितं तथैव सम्प्रत्यसंख्यबुद्धैः सङ्कल्पयन्ति तथैव भविष्येऽसंख्यबुद्धैः सङ्कल्पयिष्यन्ते तथैव मयापि सङ्कल्पितम्"।

### c. ज्ञानावाप्तये समुचितसम्प्रेरणा

तदीयपावित्र्येण जिग्मे-फुन्त्सोक-रिम्पोचे-वर्येण नायं ग्रन्थः सुस्वास्थ्यावाप्तये नापि धनावाप्तये न च सुखावाप्तये विरचितः किन्तु मञ्जुश्रियः आशीषि प्राप्तुं येन तच्छब्दैः उपदेशैश्च समेषां सचेतनानां ऐकान्तिकात्यान्तिकलाभो भवेत् । तथैव यदा वयमपि ज्ञानं प्राप्नुमः तदास्माभिः उद्देश्यः परीक्षितव्यः । केचन जनाः निष्प्रयोजनं कार्याचारणं कुर्वन्ति ते हि यदा उद्बोधनाय अन्यान् गच्छन्तः पश्यन्ति तदा ते ऋते विशेषप्रयोजनात्ताननुसरन्ति । धर्मावबोधस्य प्रयोजनं हि नैकेषां सचेतनानां प्रबोधनमस्ति न खलु आत्मलाभ एव । प्रत्येकमभ्यासकर्तृभिः स्वस्य स्वस्याः वा सम्प्रेरणा पूर्वोक्तरूपेण दृढीकर्तव्या।

# मुख्यपाठः

वज्रयाननिषेवणाय प्रेरणा
बोधिचित्तप्रबोधनाय प्रोत्साहनम्
त्यागचित्तवृत्तेर्प्रबोधनाय प्रोत्साहनम्
शीलसंवलितचरित्रस्य विकासाय प्रोत्साहनम्

## B1: वज्रयाननिषेवणाय प्रेरणा

### C1: अजेयवज्रयानाभ्यासस्य गुणाः

***गभीरोज्ज्वलसंसिद्धिसंवलितानां मन्त्राणां श्रवणमात्रमेव जनं संसारमूलोच्छेदनाय प्रवर्तयति। भवन्तः सर्वे विमुक्तये एषां मन्त्राणां सारं षाण्मासिकेनाभ्यासेन स्वहृदये उत्कीर्णं कुर्युः।***

#### a. ड्झोग्चेनाभ्यासस्य गुणाः

तथागतगर्भस्योज्ज्वलसारस्योद्घोषमजेयमहत्सिद्धिञ्च सामान्यजनाः समग्रतया ज्ञातुं काठिन्यमनुभवन्ति अथ च अल्पमेधावद्भिर्जनैः प्रायः एतदालोच्यते । ड्झोग्चेन इत्यस्य पद्यानां श्रवणादेव कोऽपि संसारकारणानां मूलोच्छेदः कर्तुं प्रभवति एवञ्च ये च शक्तिमन्तः सन्ति तेऽस्य सारस्य षण्मासं यावत् निरन्तराभ्यासेन निर्वाणप्राप्तौ समर्थाः भवन्ति तस्मादस्माभिः एतन्महत्सिद्धिः स्वहृदये स्थापयितव्या ।

महत्सिद्धिः सर्वेषां सूत्राणां तन्त्राणाञ्च सारभूता वर्तते अथ चास्याः गुणाः अव्याख्येयाः सन्ति । जनाः अस्याः श्रवणमात्रेण , ग्रन्थस्य स्पर्शमात्रेण , कस्यापि देहेन संयोजनेन अथ वा अस्याः अर्थस्य अवगमनेन च मोक्षं लब्धुं पारयन्ति । आर्यदेवस्य *मध्यममार्गसम्बद्धाश्चचतुःसहस्रपद्यद्दशा* शून्यत्वं प्रति संशयवन्तो जनाः अपि लोकत्रयस्य चक्रस्य सत्तां भेत्तुं क्षमाः । एतद्धि अजेयवज्रयानाभ्यासिभ्यः स्पष्टतरं वर्तते ।

यदि विलक्षणास्थावान् दृढधारणावान् च कश्चन जनः यथानुक्रमसज्जा, मुख्योऽभ्यासः निष्कर्षश्च इत्येतैः ङ्झोग्चेन इत्यस्य अभ्यासं करोति तदा सः जनः षण्मासेष्वेव निर्वाणं प्राप्तुं समर्थो भवति । *वज्रपञ्जरतन्त्रे* उक्तमिदं यत् “यो हि अस्खलितास्थाधारणाभ्यां षण्मासं यावतदभ्यासः कुर्वन्नस्ति सः जनः वज्रधारायाः फलं प्राप्तुं समर्थो भविष्यति” । एतत्तु *पवित्रतान्त्रिकप्रतिज्ञा* इत्यस्मिन् ग्रन्थेऽप्युक्तं यत् “निश्चितास्थाधारणाभ्यां कोऽपि जनः षण्मासेष्वेव वज्रधारायाः फलं प्राप्तुं समर्थो भविष्यति” । इतोऽपि *चेत्सुन न्यिन्थिग* अथ च *लोग्चेन न्यिन्थिग* इत्येतयोः ग्रन्थयोरप्येतदुलिखितमस्ति ।

तस्माद्धि महत्सिद्धिः श्रेष्ठतमा । जु मिफं रिम्पोचे वर्येण स्वीयोपदेशेषु उक्तं यत् “अस्मिन् पतिते युगे सचेतनाः गभीरगुरुतमशोकैरवलिप्ताः सन्ति ये हि अन्यैः धर्ममार्गैः अपाकर्तुं न शक्यते किन्तु सोऽजेयमहत्सिद्ध्या तान् शोकान् सर्वथा छेत्तुं शक्नोति ।

अत्र तदीयपावित्र्येण उक्तं यत् महत्सिद्धिः विलक्षणा वर्ततेऽतः एषा अस्माभिः न परित्याज्या नापि निन्दनीया। यदि कश्चन अमुष्यां आस्थां प्रबोधयितुं समर्थो न भवति तदा तेन असौ महत्सिद्धिः परित्याज्या आहोस्वित् तेन स्वसन्देहाः आप्तगुरुम्प्रति नेतव्याः। परं वज्रयानविषये ऋते दृढकारणात् पूर्वावधारिताः नकारात्मकसङ्कल्पाः न कस्मिंश्चिद्भवेयुः।

### b. ङ्झोग्चेनाभ्यासिनः अद्भुतदृष्टान्तः

खेन्पो सोदर्ग्यवर्यः उपदेशेषु कथयति यत् तेन आत्मना केचन ङ्झोग्चेनाभ्यासिनः साक्षात्कृताः यैः ङ्झोग्चेन इत्यस्य अनुभूतिरवाप्ता एवञ्च तैर्मृत्योः पूर्वं मङ्गलस्वरूपं दृष्टम् । सः उक्तवान् यत् सः विशेषरूपेण *मिङ्ग हुई* नाम्न्या एकया हानभिक्षुण्या प्रभावितोऽभवत्। तस्याः कथा वर्ततेऽधोलिखिताः।

*मिङ्ग हुई वर्यायाः* वज्रयाने महती श्रद्धा आसीत् । प्राथम्येन सा हान्प्रदेशे व्याधेरुपचारं प्राप्नोति स्म । तदा तया ज्ञातं यत् तदीयपावित्र्यवर्यः जिग्मे फुन्त्सोक रिन्पोचे वर्यः लारुङ्ग गार इत्येतस्मिन् स्थले ङ्झोग्चेन इत्यमुं पाठयिष्यति । तस्याः अस्मिन् संसारे कियान् समयोऽवशिष्टः इति तया न ज्ञातं परं तयानुभूतं यत् जीवनं वर्ततेऽनित्यम् । सा उपदेशप्राप्त्यै

पुर्गन्तुमुद्यता । तदीयपावित्र्येण लोङ्चेन्पा वर्यस्य *महासमाधिचित्तत्वविश्रान्तनाम* इत्यस्य शताहानि यावदुपदेशः कृतः एवञ्च सा एतावदवधिं यावत् सपरिश्रमध्ययनं कृतवती ।

उपदेशसम्पूर्त्यानन्तरं त्रयो नवत्युत्तर एकोनविंशतितमाब्दस्य सेप्टेम्बर मासस्य आद्येऽह्नि सा हान्प्रदेशे अग्रिमोपचाराय स्वचिकित्सकम्प्रत्यगच्छत् । चतुः नवत्युत्तर एकोनविंशतितमाब्दस्य मार्चमासस्य प्रथमेऽह्नि तस्याः अभीक्षिका अथ च धर्मसुहृद्भिक्षुणी झेन रु, खेन्पो सोदर्ग्यवर्यं जिन्फेङ्ग विहारात् यत्र ते वसतः स्म तत्र आहूतवती एवञ्च सा तस्मै उक्तवती यत् *मिङ्ग हुई* वर्या मृत्युङ्गता अथ च तस्याः मृत्युकाले सा गरिमासंवलिते आसने स्वीयं परम्परानुगतं गुरुममिताभञ्च प्रार्थयति स्म। तस्याः देहः सङ्कुचितः सर्वाण्यपि मङ्गलचिह्नानि प्रकटितानि। उपदेशग्रहणसमाप्तिदिवसादरभ्य तस्याः मृत्युः पूर्णे षण्मासे प्राप्तेऽभवत्। तस्मिन् एकाह्नोऽपि विसङ्गतिर्नासीत् । असौ हि नूनमतीवदुर्लभसंयोगः आसीत्।

यथा खेन्पो सोदर्ग्यवर्यः अकथयत् न खलु *मिङ्ग-हुई* न सर्वदा प्रबुद्धा प्रतिभाति स्म किन्तु तस्याः श्रद्धा नूनं सुदृढा आसीत् । ये हि महत्सामर्थ्यवन्तः सन्ति तेभ्यो महत्सिद्धेः अभ्यासाय श्रद्धा दृढविश्वासश्चैते मुख्यपूर्वयोग्यते वर्तेते । ये हि दृढविश्वासवन्तः सन्ति ते मृत्युशय्यायामपि स्वगुरुषु, त्रिरत्नेषु अथ च प्रामुख्येन वज्रयाने आस्थां न परित्यजन्ति । एते जनाः निश्चप्रचं सिद्धिं समाधिगच्छन्ति । अतः तदीयपावित्र्येण व्याख्यायितं यत् “पतितावस्थायां महत्सिद्धेः साक्षात्कारः सुदुष्करः यतो हि मार्गोऽयं वर्तते विलक्षणः। अस्माभिरेते शब्दाश्चेतसि उत्कीर्तव्याः”।

### c. ड्जोग्चेनस्य प्राथमिकोऽभ्यासः

सम्प्रति नैके वज्रयानावलम्बिनो मन्वते यत् कस्यचित् जनस्य चित्तप्रकृतिमवगन्तुं प्राथमिकी शुद्धिः अथ वा प्रकाशः ऊहितव्यः । नूनमेव सामान्याभ्यासिना प्राथमिकाभ्यासेन आरब्धव्यं तदनु सामर्थ्यप्राप्तिरन्ते च मुख्योऽभ्यासः। पूज्यः लोन्गचेन्पा, मिफं रिम्पोचे, तदीयपावित्र्यवर्यः जिग्मे फुन्त्सोक रिम्पोचे चेत्येतैः सर्वैः ड्जोग्चेनाभ्यासाय कठिनार्हताः निर्धारिताः । एतस्याभ्यासक्रमस्य परिपालनमावश्यकमन्यथा समुचितसाक्षात्कारस्य प्राप्तिरशक्या । अस्य अभ्यासक्रमस्य उल्लङ्घनं तथास्ति यथा ऋते सुदृढीकृतादाधारात्

प्रागेव भवनभित्यां चित्रविनिर्माणम् । अनेन एतच्छक्यं यत् सकलमपि भवनं भूशायी स्यात्। अतोऽस्माभिः सुदृढीकृते आधारे सत्येव चित्रकार्यं विधातव्यम्।

## C2: ड्ज़ोग्चेनाभ्यासस्योपपत्तिसमयाः

**ये हि दैववन्तस्त एव परमोपदेशं प्रत्यनुभवन्ति। ते नूनमेव नैकेभ्यः युगेभ्यः लब्धजन्मभ्यः गुणाः सञ्चयन्तस्सन्ति। ते हि बुद्धसमन्तभद्र इव प्रबोधनस्यार्हताः दधति। धर्मसुहृदः! भवन्तस्सर्वे स्वात्मनैव बद्धानन्दास्स्युः।**

### a. बुद्धसमन्तभद्र इवोपपत्तिसमयाः

अत्र *"परमोपदेशेन'* ड्ज़ोग्चेन इत्यस्य महानभ्यासः कथितः अथ च *"ये हि दैववन्तः"* इत्यनेन तेषामुल्लेखः, यैः हि अभ्यासः आरब्धः अथ वा महानुपदेशः श्रुतः अथ वा ये हि ड्ज़ोग्चेन इत्यनेन सह ईदृशपवित्रसम्बन्धेन सम्बद्धाः सन्तिः । तदीयपावित्र्यः कथयति यत् "यैः महत्सिद्धेः साक्षात्कारस्य योऽवसरः प्राप्तः तत्तु नैकेषु युगेषु लब्धसु अनेकेषु जन्मसु सञ्चितानां गुणानां फलमस्ति। एतन्महदुपदेशस्य प्राप्तिर्सूचयति यदभ्यासिनां बुद्धसमन्तभद्रस्य कर्मणोऽवस्था इव अवस्था वर्तते अतः सर्वैः धर्मसुहृद्भिर्हृष्टव्यम्" ।

अस्माकं गुरुभिः सह समागमोऽभवदथ च तेषां वज्रयानसम्बद्धः उपदेशः लब्धः, सामर्थ्यं सारभूतसंसूचनं च लब्धेऽतः वयं सर्वे हि भाग्यवन्तः स्मः। वज्रयानेन सह अयं सम्बन्धः पूर्वजन्मसु सञ्चितानां कर्मणां फलमस्तिति। पूज्यः लोन्गचेन्पा *महायानस्य निधिः* इत्यस्मिन् ग्रन्थे द्वेऽनुमाने प्रदत्तवान् ।

1. यतो हि अस्मिन् जन्मनि अस्माभिरजेयवज्रयानः साक्षात्कृतः अतः पूर्वसु जन्मसु नूनमेव अस्माभिर्नैके बुद्धाः सेवार्पणाभ्यामर्चिताः अथ च वयं तेषां अनुयायिनः किं वा शिष्याः अभवाम ।
2. यतोऽस्माभिरजेयवज्रयानः साक्षात्कृतः तेन वयं नूनमेव अस्मिन् जन्मनि, अन्तराभावे, किं वा भविष्यज्जन्मनि अनुभूतिं लप्स्यामहे ।

तस्मात् बौद्धतार्किकानुमानदृशा यदि केनापि वज्रयानं श्रुतं पठितञ्च तर्हि तस्य वज्रयानेन सह उत्कृष्टसायुज्यं भवितव्यम् । अस्मिन् जीवने वयं ड्ज़ोग्चेन इत्यमुं साक्षात्कुर्मः

अतःअस्माकं स्थितिस्तु बुद्धसमन्तभद्र इव अस्ति। अनेन उत्कृष्टतान्त्रिकधर्मणा एव समन्तभद्रेण क्षणमात्रे एव आत्ममुक्तिरवाप्ता । अस्य महान् उपदेशस्य साक्षात्कारोऽस्माकं पूर्वजन्मनि विहितानां शुभकर्मणां सञ्चयोऽस्ति ।

*प्रज्ञापारमितासूत्रे* उक्तम् - यथा गोपालकं दृष्ट्वा अरण्ये भ्रमितः कश्चन जनः अनुभवति यत् सः कमपि ग्रामं निकषा अस्ति, अथ च सः गोपालकं दृष्ट्वा भयान्मुक्तः भवति । एवमेव यथा जाले बद्धः मीनः निश्चप्रचं कूलं प्रति नीयते तद्वत् वज्रगुरोः साक्षात्कारेण अथ च वज्रयाने तस्य मार्गदर्शनेन वयं नूनमेव मोक्षं प्राप्स्यामः ।

### b. वज्रयानस्य व्रतभग्नो न भवेत्

यदि कश्चन वज्रयानमाक्षिपति आहोस्वित् गुरोः तस्य उपदेशांश्च तिरस्करोति चेत् तस्य गभीरपरिणामाः भविष्यन्ति । वज्रयानस्य व्रतानि सन्ति कठोराणि एवञ्च यदि कश्चन तानि व्रतानि भिनत्ति चेत् सः अशुभकर्मणांसञ्चयपुरःसरमधोलोकान् प्राप्नोति। एतद्धि न केवलं वज्रयानसम्बद्धमपितु बोधिसत्त्वव्रतविषयेऽपि वर्तते एवञ्च बौद्धमतस्य अभिनवाभ्यासकर्तृभ्योऽपि यानि व्रतानि हि सन्ति कठोराणि । यदि कश्चन अद्य त्रिरत्नानां शरणं याति एवञ्च पुनः श्वस्तानि रत्नानि निन्दयति सो जनः नूनमेव त्रयानप्यधिलोकान् प्राप्स्यति। तस्मात् तदीयपावित्र्येण स्वीयेऽन्योपदेशे उक्तं यत् अस्मिन् जन्मनि यावत्कोऽपि व्रतानि न अवगणयति तदा सः अग्रिमे जन्मनि ऋते वज्रयानाभ्यासादपि सिद्धतां प्राप्स्यति । वज्रयानाभ्यासिभिरस्मिन् जन्मनि व्रतानि दृढतया पालयितव्यानि ।

# B2. बोधिचित्तप्रबोधनाय प्रोत्साहनम्

## C1: बोधिचित्तप्रबोधनहेतवः

**भयसम्पृक्ते संसारसागरे निमग्नानां सर्वेषां सचेतनानां निमित्तम्,**
**तेभ्यश्च बुद्धत्वरूपी अजस्रानन्दावाप्तये साहाय्यं प्रदातुम्,**
**भवद्भिरन्यानुपकर्तुं दायित्वनिर्वहणं करणीयम्,**
**अथ च स्वात्मानुरागरूपी विषसम्पृक्तभोजनं हातव्यम् ।**

### a. अस्माभिः कथं परहितस्य दायित्वं गृहीतव्यम्?

अस्माभिः विषाक्तभोजनसमस्य अहङ्कारस्य परित्यागपुरःसरमन्येषां लाभावाप्तेः महत् दायित्वं वोढव्यं येन हि संसारस्य भयावहदुःखचक्रे निमग्नाः सचेतनाः बुद्धत्वरूपी आत्यन्तिकमानन्दमवाप्नुयुः ।

सामान्यतया सचेतनाः भवन्ति द्विविधाः, आद्याः सन्ति प्रबोधिताः जनाः यैरैकान्तिकात्यन्तिको वा शान्तिरानन्दश्चावाप्तः यथा अर्हद्वृन्दः, प्रत्येकं बुद्धाः,बोधिसत्त्वाः एवञ्च बुद्धाः यैः सम्यग्गुणप्रज्ञे समर्जिते। प्रबोधनेन प्राप्तौ शान्तिरानन्दौ यैः नास्वादितौ ते सन्ति अपराः, ते च स्वकर्मभ्यः अस्मिन् भयावहसंसारे निमज्जयितुं सन्ति धर्षिताः।

संसारो नाम अबाधितरीत्या गतिमान् सन् भ्रमणम्। अस्मिन् संसारे सचेतनानां षड्विधयोनयः सन्ति । ताः सन्ति- देवाः, असुराः, मानवाः, पशवः, बुभुक्षितप्रेताः, नरकवासिनश्च । इमे सर्वे षड्सु योनिषु भ्रमन्ति परं कदाचित् स्वीयैः शुभकर्मभिः उपरि लोकेषु भवन्ति प्रोन्नताः यत्र हि दुःखलेशः वर्तते परं स्वीयैः अशुभकर्मभिः सत्त्वरमेव अपरेषु त्रिषु अधोलोकगह्वरेषु कर्ष्यन्ते। यथा चन्द्रकीर्तिना स्वीये *माध्यमिके* ग्रन्थे भणितम्-

*सचेतनाः आदौ अहमिति विचार्य भवन्त्यात्मश्लिष्टाः*
*ममेति विचार्य भवन्ति वस्तुषु आसक्ताः ।*
*तदा ते कूपस्थजलचक्रे उदञ्चनमिव भवन्ति असाहाय्याः,*
*तेभ्यः करुणया अवनतो भवामि!*

बुद्धबोधिसत्त्वानामात्मानुभूत्या एवञ्च तेषां प्रामाणिकोपदेशानुसारेण अस्माभिः ज्ञातं यत् सर्वे मोहितजनाः पूर्वस्मिन् जन्मनि अस्माकं पितरः आसन् इदानीं ते क्लेशसंपृक्ताः सन्ति। प्राक्तनजन्मनि वयं तैः पालिताः अतः अस्माकं तैः सह वर्तते सम्बन्धः। यद्यपि अस्मिन् जन्मनि ते अस्मान् न प्रत्यभिजानन्ति तथापि न केऽपि काः अपि वा, ये याः वा खलु विवेकसम्पृक्ताः सन्ति ते ताः वा स्वस्य शान्तिरानन्दावाप्तये तान् नैव दूरीकरिष्यन्ति अपितु तेषां सर्वोत्कृष्टशान्तिरानन्दावाप्तेर्विनिश्चयं करिष्यन्ति। एतद्धि तान् भयावहसंसारसागरात् आत्यन्तिकरूपेण मोचयितुं अथ च परमप्रबोधनमवाप्तये वर्तते।

तस्मात्, उत्तमभोजनवस्त्रादिभिः तेषामैकान्तिकानन्दावाप्तये अस्माभिः परोपकारस्य दायित्वनिर्वाहो विधेयः युगपच्च अर्हतां, बुद्धानां, बोधिसत्त्वानाञ्च अनुभूत्या परमानन्दावाप्तये ते प्रचोदितव्याः। अस्माभिः यावान् शक्यः तावान् विषसमः स्वार्थः हातव्यः अन्यथा तस्य प्रतिफलं गभीरं भवेत् । एतद्धि शान्तिदेवस्य *बोधिसत्त्वस्य मार्गः* इत्येतस्मिन् ग्रन्थे वर्तते निबद्धं तद्यथा-

*यद्यहं आत्मानुरञ्जये चेदन्यानपकुर्वे,*
*तर्ह्यहं नरकलोकेषु दुःखमनुभवविष्यामि ।*
*यद्यहं पराननुरञ्जयितुं आत्मानमपकुर्वे,*
*सकलमप्यौत्कृष्ट्यं मदायत्तं स्युः ।*

### b. आत्मानुसक्तिरूपः विषस्य परित्यागः

एकदा यदा *रा लोत्सवा* एकान्ते स्वीयदेवं ध्यायन् आसीत् तदा तेन अनुभूतं यत् सः आजीवनं एषः निर्जनैकान्तवासमभिलषति स्म । परमेकदा तस्य देवः तमवोचत् यत् " त्वया सचेतनोपकाराय बहिरपि गन्तव्यम्, अल्पकालात्मकोऽपि विहितोऽयं परोपकारः महता परिश्रमेण स्वीयदेवस्य निर्जनैकान्ते सहस्रयुगपर्यन्तं विहितध्यानापेक्षया वर्तते श्रेष्ठतमः" । अतः परोपकारचित्तवृत्या विहितस्य परोकारस्य गुणाः स्वार्थवृत्त्या अनन्तवर्षं यावत् विहिततपसः अपेक्षया वर्तते श्रेष्ठतराः। पुनरपि शन्तिदेवस्य *बोधिसत्त्वस्य मार्गः* इत्यत्र भणितं यत्-

*लोकेऽस्मिन् विद्यते यत्सकलमपि सुखं*

*तद्धि प्राप्यते परेषां सुखकामनया ।*

*लोकेऽस्मिन् विद्यते यत्सकलमपि दुःखं*

*तद्धि प्राप्यते आत्मसुखकामनया ।*

तस्मादभ्यासावधौ अस्माकं बोधिचित्तेन नापगन्तव्यः । पात्रुल रिम्पोचे उक्तवान् यत् " ऋते बोधिचित्ताधारात् यदि भवान् अजेयमहत्सिद्धिमभ्यसति चेत् तदभ्यासः हीनयानम् तीर्थिका वा उच्यते" ।

अतः तदीयपावित्र्येण जिग्मे-फुन्त्सोक-रिम्पोचे-वर्येण उक्तं यत् स्वार्थवृत्तिः विषसमा, एतद्धि वर्तते उपयुक्ततमोपमा, यद्विषयेऽस्मिन्नस्माभिः सततं चिन्तितव्यम्। ये जनाः प्रबलस्वार्थवृत्तिसंवलिताः सन्ति ते सन्तु नाम कुत्राप्यवस्थिताः, तेषां विनिपातः वर्तते निश्चप्रचम् । प्रायोऽस्माकं सर्वे तर्काः, शोकाः, कलहाश्च स्वार्थोद्भूताः सन्ति, यदि वयं स्वार्थरहिताः भवेम चेदेते तर्कादयो नोद्भविष्यन्ति । तस्मात् अस्मिन् स्वार्थवृत्तिपरित्यागे प्रयत्नवद्भिः अस्माभिः बोधिसत्वं भवितव्यम् ।

वस्तुतः जनाः किं कथयन्ति विषयेऽस्मिन् न अधिकं चिन्तितव्यम् किन्तु यावत् वयं योग्याः स्मः जीवेमश्च तावदन्येषां लाभाय उपकाराय वा यत्किमपि वर्तते शक्यं तदस्माभिर्नूनमेवाचरणीयम् । वयं किं कुर्मः विषयेऽस्मिन जनाः अभिज्ञाः अनभिज्ञाः वा स्युः उभयमपि वर्तते योग्यम् । अहं विश्वसीमि यदस्मिन् जीवनावधौ अस्माभिर्विहितानां केषाञ्चन कार्याणामभिज्ञानं जनान्न कदापि भविष्यति किन्तु तेषामभिज्ञानं समस्तबुद्धान्, बोधिसत्वान्, अस्मद्गुरूञ्च तेषां कर्मणामभिज्ञानं नूनमेव भविष्यति। एवञ्च कार्यकारणसिद्धान्तः नितरां प्रवर्तते । अतः स्वस्य कीर्तये प्रतिष्ठायै च विहितस्य परोपकरस्य न किमपि मूल्यमस्ति । लौकिकचिन्तया दूषणापेक्षया अस्माभिः साकल्येन अन्येषां लाभायैव प्रयतनीयम् ।

## C2 : बोधिचित्तप्रबोधनस्य लाभाः

**इदं हि अधोलोकस्य द्वारमवरुणद्धि,**

**ऊर्ध्वलोकस्यानन्दानधिगन्तुमनुमनुते,**

**फलतो बोधितचित्तप्रबोधनं युष्मान् संसाराच्चरममुक्तिम्प्रति नयति,**

**युष्माभिरक्षिप्तचित्तो भूत्वा अपरिहार्योपदेशोऽयमभ्यसनीयः।**

### a. बोधिचित्तस्य लाभाः

बोधिचित्तप्रबोधनस्य लाभाः सन्तीमे- अधोलोकस्य द्वारस्यावरोधनम्, देवमानवानामूर्ध्वलोकेषु अस्मभ्यमैहिकशान्तिरानन्दयोरवाप्तिश्च, अथ च अस्मान् संसाराच्चरममुक्तये समर्थीकरोति, एतत्तथ्यावगमनेन प्रत्येकधर्माभ्यासिभिरक्षिप्तचित्तो भूत्वा अयमपरिहार्योपदेशोऽभ्यसनीयः।

बोधिचित्तस्य लाभाः, बोधिचित्तस्याकाङ्क्षा आहोस्वित् बोधिचित्तस्य कर्म, एतावुभावापि वर्तेते असीमितौ अपरिमितौ च। एतत् सर्वं हि सुविस्तरेण *शिक्षासमुच्चये, बोधिसत्त्वाचर्यावतारे एवञ्च बहुषु महायानसूत्रेषु* वर्णितमस्ति। सामान्यरूपेण बोधिचित्तस्य गुणाः द्विधा स्फुटीभवन्ति:

1. यदि कश्चन प्रामाणिकबोधिचित्तं प्रबोधयति चेत् सर्वेऽपि अशुभकर्माणि सततं चित्ते विनश्यन्ति, फलतः अधोलोकस्य द्वाराणि अवरुन्धन्ति। शन्तिदेवेनोक्तं यत्-

*यथान्तकाले वह्निना विशुद्धीक्रियते सकलं,*
*तथैव बोधिचित्तेनापि दह्यन्ते महापापानि सर्वथा।*
*तस्मादस्य लाभाः सन्त्यसीमिताः,*
*प्रबुद्धेन प्रियेण च देवेन यथा ज्ञापितः सुदेवः।।*

अत्र हि महापापैः कथ्यन्ते अशुभर्माणि येषामपाकरणं वर्तते दुष्करम्, तेषामशुभकर्मणां सञ्चयो भवति सत्वरप्रतिफलान्वितैः पञ्च अपराधैः धर्मभर्त्स्नया वा। यथा प्रलये सकलमपि संसारं वह्निः दहति तथैव एतानि कर्माणि तस्मिन् काले दहन्ति यस्मिन्

काले कस्यचित् चित्ते बोधिचित्तप्रबोधनं भवति। यदि कस्यचित् अशुभकर्मणामपाकरणं भवति तदा अधोलोकेषु पतनस्य सम्भावनाभावो भवति।

तस्मात् तदीयपावित्र्येण उक्तं यत् बोधिचित्तसंपृक्तो जनः अधोलोकेषु न पतितुमर्हति। अस्माभिः प्राङ्गृत्योः बोधित्तप्रबोधनाय सर्वथा प्रयतनीयम्, एवञ्च अस्माभिः विनिश्चितव्यं यदस्माकं प्रबोधितो बोधिचित्तो नोपहतो भवेत् अनेन अधोलोकेषु अस्माकं पुनर्जन्म न भविष्यति।

2. बोधिचित्तेन जनस्य आध्यात्मिकमूलं सुदृढं भविष्यति। फलस्वरूपम् ऊर्ध्वलोकानां ऐकान्तिकशान्तये ऐकान्तिकानन्दाय च कश्चन जनः मानुष्याम् आहोस्वित् देवयोनौ पुनर्जन्म प्राप्तुमर्हति, इतोऽपि सः जनः पञ्चमार्गाणां दशभूमीनां च गुणान् सेत्स्यति एवञ्च बुद्धत्वस्य श्रेष्ठतमम् अजेयफलं प्राप्स्यति।

अतः सचेतनेभ्यः बोधिचित्तस्य सचेतनेभ्यः लाभाः सन्ति प्रभूताः, शान्तिदेवः अवोचत् यत्-

*दुःखापहारी प्रारूपः*
*लोके भ्रमद्भ्यो जनेभ्यो विद्यते हर्षस्य कारणमिदम्।*
*अमूल्याभिवृत्तिः मनसः इदं रत्नं-*
*कथमिदं परिमातव्यं युक्तं वा?*

### b. बुद्धैः प्रदत्तनिष्कर्षः

अनन्तयुगपर्यन्तं दीर्घावधिं यावत् कृतचिन्तनेन अजेयप्रज्ञया च बुद्धैः निष्कर्षोऽयं प्रदत्तः। यथा वैज्ञानिकैः दीर्घावधिं यावत् शोधकार्यं क्रियते येन हि तेषां आविष्कारः मानवानां महते उपकाराय कल्पेत तथैव बुद्धेन विज्ञातं यत् बोधिचित्तः समेषां सचेतनानां महान् लाभकारी भविष्यति। दीर्घावधिपर्यन्तं पौनःपुन्येन अवलोकनेन इदमवबुद्धं यत् बोधिचित्तप्रबोधनेन अगण्यसचेतनाः बुद्धत्वस्य परं फलं सारल्येन प्राप्तुमर्हन्ति। तस्मात् शान्तिदेवः अवोचत् यत्-

*अनेकयुगेषु गहनतया विमृशन्तो महान्तो बुद्धाः*

*दृष्टवन्तः यदिदमेव रक्षिष्यति*

*अनन्तसचेतनान्*

*एवञ्च तान् परमानन्दम्प्रति नयति।।*

तस्मात् तदीयपावित्र्येण स्वीयाः सर्वेशिष्याः सर्वथा विक्षोभरहितो भूत्वा बोधिचित्तप्रबोधनाय अथ च अस्य अपरिहार्योपदेशस्य अभ्यासाय प्रचुद्यन्ते। अष्टविधलोकविपत्तिभिः अस्मच्चित्तः विभ्रमितो मा भूत् अथ च पथभ्रष्टाः न भवेम। बोधिचित्तस्य सारभूतसंसूचनस्य अभ्यासः अस्माभिः दृढतया कर्तव्यः। यतो सर्वेषु अभ्यासेषु अयमभ्यासः महत्त्वपूर्णः अथ च अमूल्याभिगमश्च वर्तते।

## B3. त्यागचित्तवृत्तेर्प्रबोधनाय प्रोत्साहनम्

### C1: नियमपरिपालनस्य गुणाः

**संसारस्य भव्यायोजनानाङ्कृते तृष्णायाः लेशमात्रमपि चिन्तनं न स्यात् ।**
**पवित्रनियमाः परिपालनीयाः,**
**इमे नियमा एव संसारस्य प्रकृष्टालङ्करणानि सन्ति**
**येभ्यो नियमेभ्य एव मनुष्यदेवगणाश्च सर्वश्रेष्ठार्पणं विदधति ।**

#### a. यथार्थत्यागसंवलितचित्तः

संसारात् आत्यन्तिकमुक्तये, सामान्यसंसारविषयिकीषु आकर्षकघटनासु अथ च सम्पत्तौ अस्माकं ईषदपि कामना नैव स्यात्। तत् स्थाने अस्माभिः पवित्रान्तःकरणेन पवित्रनियमाः परिपालनीयाः, येभ्यो नियमेभ्य एव मनुष्यदेवगणाश्च सर्वश्रेष्ठार्पणं विदधति। ये हि पुनर्जन्मनः चक्रं विभज्य निर्वाणं प्राप्तुमिच्छन्ति तेभ्यः कीर्तिप्राप्तिः, शक्तिः, उच्चसामाजिकीप्रतिष्ठा एवञ्च ऐन्द्रियसुखम् एतत् सर्वं हि वर्तते निरर्थकम् अथ च पूर्वोक्तेषु कापि कामना नोद्भावितव्या। तेषां कृते महार्हयानानि भवनानि च स्वप्नभूतानि विभ्रमात्मकानि बुद्बुद इव सन्ति। ते हि वाचालाः न भवन्ति परं ते निश्चप्रचं अनुमन्वते यत् एते त्रयो लोकाः वह्नौ दहन्ति गृहाणि इव सन्ति येषु नास्ति क्षणिकं सुखम् । ते हि यथार्थत्यागसंवलितचित्तवृत्तियुक्ताः सन्ति ।

यद्यपि नन्दवन्नैके जनाः आदौ सांसारिकजीवनं प्रति आकाङ्क्षाः अनुरक्तिं च सर्वथा हातुं न समर्थाः भवन्ति, परं यदि दीर्घावधौ बुद्धोपदेशान् वयं पठेम चेत् अवश्यमेव संसारविषयकीम् असुरक्षां प्रति जागरुकाः भवेम। इतोऽप्यधिकम् आत्मसु त्यागचित्तवृत्तिम् उद्बुधेम ।

तर्हि कथं यथार्थत्यागसंवलितचित्तवृत्तेः उद्बोधः भवेत्? तस्मिन् चतुर्विधविचारेषु ऋते चिन्तनाद् नास्ति काप्यन्या श्रेष्ठतरा विधा : 1)मानवजन्मनः अमूल्यता 2) जीवनस्य अस्थैर्यं 3) संसारस्य नैयून्यम् 4) कार्यकारणनियमस्य निरत्ययः । यदा एषां चतुर्विध-सामान्य-प्राथमिकाभ्यासानां परिपूर्तिःभवेत् चेदवश्यं हि चित्तेषु नैरन्तर्येण त्यागवृत्तेः उद्भवः स्यात् ।

यथा कश्चन बद्धजनः कारागारात् आत्मानं विमोचयितुं प्रयतते  तथैव वयमपि अहोरात्रं संसारात्  विमुक्तये एषिष्याम ।

लामा त्सोन्खापा *मार्गस्य त्रयः प्रमुखपक्षाः* इत्यस्मिन्  कथयति यत्-

*स्वात्त्र्यप्रतिष्ठे वर्तेते दुर्लभे,*
*नातिरिक्तोऽस्ति जीवने समयः।*
*एतेन अवबोधनेन,*
*भौतिकाकर्षणम्प्रति मोहो व्युत्क्रमते ।।*

*कर्माणि तत्परिणामाश्च सन्त्यपरिहार्याः*
*एवं पौनःपुन्येन चिन्तनेन,*
*अथ च पौनःपुन्येन सांसारिकदुःखस्य चिन्तनेन*
*अनागतजन्मनां भौतिकाकर्षणं व्युत्क्रमते ।।*

*तथाविधेन मार्गानुसारिप्रशिक्षणेन निपुणो भूत्वा*
*सांसारिकसिद्धिविषये आकर्षणम्,*
*क्षणमात्रमपि नोद्भवति,*
*अथ च अहोरात्रं निर्वाणप्राप्तेर्मतिः उदेति*
*ततः त्यागचित्तवृत्तिस्समुद्भवति।।*

## b. संसारस्य प्रकृष्टालङ्करणम्

त्यागचित्तवृत्तेः उद्भवमनु अस्माभिः पवित्रनियमाः प्राप्तव्याः परिपालनीयाश्च, ये संसारस्य प्रकृष्टतमाभरणवद्वर्तन्ते। अथ च येभ्यो नियमेभ्यो मनुष्यदेवगणाश्च अर्पणं विदधति। एते नियमाः हि सर्वेषां धर्म्यगुणानामाधारभूताः सन्ति। *प्रतिमोक्षसूत्रे* उक्तं यत् “इदं हि सम्यग्गन्तव्यानां प्राप्तये वर्तेते सेतुभूतम्”। बौद्धभिक्षुभिः कुण्डलकङ्कणादिभिरलङ्कारैरलङ्करणं नोचितम्। परमेतैः निर्दुष्टैः नियमस्वरूपैः तेजस्विभिराभूषणैः सुशोभितोऽभ्यासी वर्तते वन्दनीयः,पूजनीयश्च अथ च देवमानवैः अर्पणार्होऽस्ति।

प्रत्येकं सचेतनस्य सन्ति भिन्नक्षमताः अथ च सः स्वीयार्हतानुसारं नियमम्बद्धान् विभिन्नस्तरान् प्राप्तुं शक्नोति। यदि कस्यचित् जनस्यास्ति सुदृढत्यागचित्तवृत्तिः चेत् सः सा वा दीक्षां प्राप्तुमर्हति एवञ्च श्रमणेरस्य श्रमणेरिकायाः वा भिक्षोः भिक्षुण्याः वा नियमानां परिपालनं कर्तुमर्हति। यदि परिस्थितयः गृहपरित्यागपुरःस्सरं बौद्धमठगमनानुकूल्यं न भजन्ते तर्हि सामान्याभ्यासिभ्यः ये पञ्चनियमाः सन्ति निर्धारिताः तेषु कतरः नियमः परिपालनीयः आहोस्वित् त्यागचित्तवृत्त्या निर्दिष्टानां प्रतिज्ञानां स्वीकरणं कर्तव्यम्। यदि एकोऽपि नियमः सावधानतया न परिपाल्यते चेदभ्यासिभिः गुणसञ्चयोऽसम्भवप्रायः। नागार्जुनस्य *सुहृल्लेखे* उक्तं यत्-

*युष्माकं प्रतिज्ञाः अक्षुण्णा अपतिताः*
*अदृप्ताः निर्दुष्टाश्च स्युः।*
*यथा धरा सर्वेषां चराचराणामाधारभूता वर्तते*
*तथैव यत्सर्वं भद्रं तदधिगतोऽनुशासने।*

इयं धरा सर्वेषां वर्तते आधारभूता तथैव सर्वे गुणाः नियमान् आधृत्य समुद्भूताः सन्ति। यदि वयं एकमपि नियमं न प्राप्स्यामः पालयिष्यामश्च चेदस्माकं देवमानुषयोनौ जन्म अपि वर्तते दुष्करं का वार्ता तु निर्वाणसमुपलब्धेः। तस्माद् थोग्मेजेन्पे *बोधिसत्त्वस्य सप्तत्रिंशदभ्यासाः* इत्यस्मिन् ग्रन्थे कथयति यत्-

*यदि कस्मिन् वर्तते अनुशासनलेशः चेत् स आत्मकल्याणप्राप्तौ भवत्यसमर्थः*
*तेन अन्यैः कल्याणप्राप्तिरस्ति उपहासास्पदा।*
*अतः सांसारिकप्रयोजनेन विना*
*अनुशासनपालनमेव वर्तते बोधिसत्वाभ्यासः।।*

## C2: नियमभङ्गस्य परिणामः

**यतस्सर्वेऽप्यैकान्तिकात्यन्तिकानन्दाः**
**शुद्धनियमपरिपालनस्यैव परिणामाः सन्ति,**

**तस्मात् नियमानां भङ्गः जनानामधोलोके पुनर्जन्म प्रति नयति**
**भ्रान्तिं परित्यज्य युष्माभिः समुचितविकल्पश्चेतव्यः।**

देवमनुष्यलोकेषु पुनर्जन्मनः ऐकान्तिकलाभाः अथ च बुद्धत्वस्य परमानन्दः निर्वाणश्च एते त्रयोऽपि सन्ति परिणामाः पवित्रनियमपरिपालनस्य। यदि कश्चन नियमान् भिनत्ति पुनश्च पूर्णतया प्रायश्चित्तमपि न करोति चेत् सो जनः अवश्यमेव त्रयो अधोलोकेषु पतति। अतः एतदावश्यकं यदभ्यासिना स्वाचरणे सम्यग्विकल्पाश्चेतव्याः भ्रान्तौ च तेन न पतितव्यम्।

एतद्धि *प्रतिमोक्षसूत्रे* भणितं यत् नियमभ्रष्टानां गन्तव्यं नरकजीवाः, बुभुक्षिताः प्रेताः, जन्तवश्चेतैर्युक्ताः त्रयोऽधोलोकाः एव सन्ति। तथैव *संक्षिप्तप्रज्ञापारमितासूत्रेऽपि* अस्ति भणितं यत् "ये नियमभङ्गं कुर्वन्ति ते आत्मकल्याणप्राप्तौ भवन्त्यसमर्थाः का वार्ता तु परहितसिद्धेः"।

एतस्यां पतितावस्थायां पवित्रनियमानां परिपालनं कठिनात् कठिनतरम्प्रति याति। विशेषतः, अस्मिन् भौतिकततासंवलिते सूचनात्मके युगे मठस्थजनैः निर्दिष्टनियमानां परिपालनं काठिन्यम्प्रति गच्छति। चलचित्रं, सङ्गणकयन्त्रं,चलदूरभाषयन्त्रम् इत्येतानि सर्वाणि यन्त्राणि अविरतमिन्द्रियोत्तेजनं जनयन्ति जनान् प्रलोभयन्ति च। परिणामतः, अनेकेषां जनानां चित्ते यथार्थत्यागवृत्तिः नोद्भवति अथ च केचन एव जनाः प्राचीनाभ्यासिवत् दूरस्थैकान्तस्थलीषु स्थित्वा एकाग्रतया धर्माभ्यासे समर्थाः भवन्ति।

यदि अस्मत्सु त्यागवृत्तेः अपेक्षितः स्तरः स्यादथ च निर्वाणप्राप्तेः यथार्थकामना भवेत् तर्हि तिसृणां प्रतिज्ञानामाश्रयः पञ्चनियमानाञ्च परिपालनमनिवार्यम्। यदि कश्चन एकस्याः अपि प्रतिज्ञायाः भङ्गः विदधति तदा योग्यगुरोः समक्षं ताः प्रतिज्ञाः पुनः स्वीकर्तव्याः।

एतस्य कारणमस्ति यत् यथा सस्यं, पुष्पाणि, वृक्षाः भूमौ एव जायन्ते तथैव सर्वेगुणाः नियमभूताधारभूमौ एव जायन्ते संवर्धन्ते च। लामा त्सोङ्ग्खापा *प्रबोधनस्य प्रमुखमार्गः* इत्येतस्मिन् ग्रन्थे सूत्रस्य उद्धरणं दत्वा कथयति यत् बुद्धेभ्यो बोधिसत्वेभ्यश्च सहस्रयुगपर्यन्तं कृतार्पणानां गुणानामपेक्षया, एतादृशे पतितसमये एकस्यापि दिवसस्य

नियमपरिपालनं श्रेष्ठतरमस्ति। वयमस्मिन् पतितसमये भ्रान्तचेतसः दिङ्गमूढाः न भवेम। नियमसंरक्षकाणां कारणपरिस्थितीनां स्वीकृतिः अथ च नियमभङ्गविधायिनीनां विषमपरिस्थितीनां परित्यागः, एतयोरुभयोः चयनमस्माभिः विशिष्टसावधानतया कार्यम्। एतद्धि अस्माकं अग्रिमं लक्ष्यम्।

## B4. शीलसंवलितचरित्रस्य विकासाय प्रोत्साहनम्

### C1: शीलसंवलितचरित्रस्य विकासहेतवः

> **सुहृद्भिस्सह वचसि कर्मणि चैक्येनोपक्रमणीयम्,**
> **शीलनिष्ठत्वेन दयासंवलितत्वेन च जनैर्भाव्यम्,**
> **स्वात्मानं दीर्घकालावधिपर्यन्तमुपकर्तुम् ,**
> **सारभूतसंसूचनमस्ति यत् प्रवर्तमाने क्षणेऽन्ये उपकरणीयाः।**

#### a. शीलसंवलितचरित्रस्य महत्त्वम्

शीलसंवलितचरित्रेण तात्पर्यमस्ति यत् अस्माभिः वचसा कर्मणा च बन्धुसुहृदामनुकूलतया भाव्यमथ च वयं सत्यनिष्ठासम्पृक्ताः, करुणावन्तश्च भवेम। यदि वयं सुदीर्घावधिं यावत् आत्मानं लाभान्वितं कर्तुं चिकीर्षामः चेत् प्रवर्तमाने समये अन्येऽस्माभिः उपकर्तव्याः।

धर्माभ्यासः शीलसंवलितचरित्रमपेक्षते। तदीयपावित्र्येण अनेकवर्षं यावत् प्रदत्तैः स्वीयैः उपदेशैः अयमनिवार्योपदेशः उपसंहृतोऽस्ति। तदीयपावित्र्यस्य मतेन यः कोऽपि लरुङ्ग गर इत्येतत् स्थलेऽधीते, तेन त्रयो नियमाः अवश्यमेव पालनीयाः, ते सन्तीमे- १) शीलसंवलितचरित्रं विकसनीयम् २) पवित्रनियमाः रक्षितव्याः ३) धर्मोपदेशः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च।

यदि कश्चन महायानस्य उपदेशानधीते आहोस्वित् वज्रयानस्य एतद्धि परमावश्यकं यत्तेन शीलसंवलितचरित्रवता भाव्यम् एतस्याभवे धर्माभ्यसे प्रगतिरशक्या। जु मिफं रिम्पोचे *साधारणासाधारणनियमेष्वुपदेशाः* इति ग्रन्थे कथयति-

> *सांसारिकनियमाः सन्ति बौद्धधर्मस्याधारभूताः*
> *यदि कश्चन अस्मिन् संसारे शुभाचरणेन न व्यवहरति,*
> *चेत् सः कथमपि बौद्धधर्मस्य सिद्धान्तान् न ग्रहीष्यति*
> *निर्वाणप्राप्तेस्तु का वार्ता।*

### b. किमस्ति शीलसंवलितचरित्रम्?

अस्मिन् पद्ये तदीयपावित्र्येण शीलसंवलितचरित्रस्य अधोलिखितानि मानकानि अभिज्ञातानि एवञ्च अस्माभिः तानि सदैव स्मर्तव्यानि इति सः आशास्ते।

*“अस्माभिः सदैव वचसा कर्मणा च बन्धुसुहृदामनुकूलतया भाव्यम्”।* अस्माभिः बान्धवानां सुहृदाञ्च वयः प्रतिष्ठाञ्च अनपेक्ष्य तैस्सह शुभाचरणेन वर्तनीयम्। लौकिकदृष्ट्या शीलसंवलितचरित्रवान् जनः स्वस्मात् उच्चस्तरेभ्यः जनेभ्यः आदरेण व्यवहरति, वञ्चितेषु जनेषु कारुण्येन व्यवहरति अथ च समस्तरीयेषु जनेषु सौहार्देन व्यवहरति।

तिब्बतक्षेत्रे एकं रूपकमस्ति : ‘यदा शतं चमरी गावः पर्वतमारुहन्ति परमवरः चमरी गौः तदधः धावति’। एतद्धि सुस्पष्टं निदर्शनमस्ति। नकारात्मकजनस्य व्यवहारः अन्यान् प्रति संघर्षमयो भवति। एतादृक् जनः यदा जनेभ्यः दूरं याति तदा ते जनाः विगतक्लमाः भवन्ति। यथा अक्ष्णः विकारस्य शल्यक्रियया अपाकरणं सुखाय कल्पते तथैव नकारात्मकजनानां प्रस्थानमुत्सवस्य कारणं भवति ।

यथा बुद्धः कथयति “मया लोकजनानुगुणं व्यवहर्तव्यम्” । यदि स्वयं बुद्धः एवमाचरति तर्हि अस्माभिः सामान्यजनैः नूनमेव तथैव व्यवहर्तव्यम् । लोकानुवर्तनेन नायमभिप्रायः यत् जनानां लोभेर्ष्यानुरूपम् अस्माभिः व्यवहर्तव्यम् । वयं सिद्धान्तशून्याः न भवेम । वयं तानि एव कर्माणि परिपालयामः यानि सन्ति न्यायसङ्गतानि धर्मानुरूपाणि च । अनेन प्रकारेण प्रत्येकं जनैस्सह सौहार्देन वर्तयामः।

*“सत्यनिष्ठावान् भवेयम्”* । यत्किमपि वयं ब्रूमः कुर्मश्च, अस्माभिः निर्मलमनसा, सत्यवता, निष्पक्षत्वेन च भाव्यम्। वयं आत्मासक्तिरहिताःअन्यान्प्रति घृणाः रहिताश्च स्याम। इतोऽपि अस्माभिः आत्मानं प्रभुत्वे स्थाने नैव स्थापनीयं न च किमप्यनुचितरीत्या निर्णेतव्यम् । वयं अवश्यमेव सत्यवन्तः निष्पक्षाश्च । तस्मात् सत्यनिष्ठायुक्तो जनः नूनं भवितव्यः। यदि कथमपि वयं अन्यथाज्ञाताः अपकीर्तिताः वा भवामः परं यदि वयं सत्यनिष्ठावन्तः स्मः चेत् न कोऽप्यस्मान् नितरामपाकर्तुं शक्नोति। अस्माकं

सत्यकरुणासंवलिता प्रकृतिः तदा सुवर्णवत् राजिष्यति एवञ्च बाधाभ्यः तमोभ्यश्च सा नैव मलिनीभविष्यति।

*“दयासंवलितहृदयेन सह”* यदि कश्चन सत्यनिष्ठावानस्ति अथ च लोकानुरूपमाचरति किन्तु मनसा पतितः वर्तते तर्हि तस्य नैतिकता शङ्कास्पदा। चित्तो ह्यस्ति सर्वेषां मूलम्। लामा त्सोङ्खापा कदाचित् अवोचत्-

*यदि भावनास्ति शुभा तदा मार्गस्तरौ अपि भवतः शुभौ।*
*यदि भावनास्ति अशुभा तदा मार्गस्तरौ अपि भवतः अशुभौ।*
*यतो हि सर्वं भावनायां प्रतिष्ठितम्,*
*तस्मात्ताः भवेच्छुभाः इति सुनिश्चेतव्यम्।*

यदि कश्चन दयासंवलितहृदयवान् अस्ति तर्हि सर्वं हि ज्योतिर्मयो भविष्यति परं यदि कस्यचित्/कस्याश्चित् हृदयं नास्ति दयासंवलितं चेत् सः/सा वा अन्धकारं प्रति यास्यति।

एते त्रयः सज्जनतायाः सिद्धान्ताः वर्तन्ते महत्त्वपूर्णाः। यदि वयं सुदीर्घावधिं यावत् आत्मानं लाभान्वितं कर्तुं चिकीर्षामः चेत् प्रवर्तमाने समये अन्येऽस्माभिः उपकर्तव्याः, एषो ह्यस्ति प्रभावी सारः। साधारणजनत्वेन एतद्धि वर्तते अव्यवहारिकं यत् वयम् आत्मलाभविषये न चिन्तयामः परं स्वलक्ष्यप्राप्तेः प्रक्रियायां यदि वयमस्मत्परितः विद्यमानान् जनान् पीडयामः तर्हि वयं न कदापि स्वलक्ष्येषु साफल्यमवाप्स्यामः। आत्मलाभाय विहितः अन्योपकारः स्वार्थपूर्णः प्रतीयते किन्तु अनया भावनया अस्माभिर्न भाव्यम्। यदि कश्चन सर्वथा परोकारिचित्तस्य समुदये समर्थो न भवति तर्हि तेन न्यूनातिन्यूनं स्वप्रगतये स्वस्य स्थितये च अन्येभ्यः दयालुतया भाव्यम्।

एकदा तदीयपावित्र्येण परिहासपूर्वकं कथितम् – “अनेकवर्षाणामनुभवानन्तरं मया अवलोकितं यत् नैके जनाः लोकविषयकविवेके भवन्ति शून्याः। ते स्वार्थसंवलिताः आत्मलाभाय यतन्ते यद्यपि नास्त्येषा शुभा नीतिः। उदाहरणतया यदि कश्चन युवा कामपि प्रीणाति अथ च तस्याः स्वातन्त्र्यं नियन्त्र्य तामीशीतुं प्रयतते चेत् परिणामः प्रायः भवति विषमः पुनश्च कश्चन तदन्यथा रीत्या पूर्णरूपेण प्रियं समर्थयति साहाय्यं च विदधाति एतेन

प्रायः सः स्वप्रियेण स्वीक्रियते। यदा अस्माभिः बौद्धधर्मः अधीयते अथ च शीलसंवलितचरित्रस्य महत्त्वं नावबुद्ध्यते पुनश्च शुभचरित्रविकासाय न किमपि यत्नं विधीयते तदा अस्माकं अभ्यासे वयं न कदापि न कामपि बुद्धत्वावस्थां प्राप्तुं पारयामः" ।

## C2: शीलसंवलितचरित्रसंधारणस्य गुणः

**इदं हि सच्चरित्रं वर्तते सज्जनतायाः विशुद्धमानदण्डभूतम् ,**
**अथ चेदमेव वर्तते भूतभविष्यवर्तमानानां बुद्धानां बुद्धत्वाप्तेर्साधनम्,**
**मम सर्वे शिष्याः! युष्माभिश्चतुर्विधाकर्षणधर्माणां सारो न विस्मर्तव्यः।**

### a. शीलसंवलितचरित्रसंधारणस्य गुणः

मतनिरपेक्षदृशा शुद्धनैतिकदृशा च शीलसंवलितचरित्रस्य सन्धारणमस्ति सज्जनतायाः पर्यायः। बुद्धत्वकामनायाः दृशा, वर्तमानभूतभविष्यकालिकेभ्यः सर्वेभ्यः बुद्धेभ्यः इदं शीलसंवलितचरित्रस्य सन्धारणं बुद्धत्वप्राप्तेः सर्वथा योग्यमार्गः वर्तते। बोधिसत्त्वैः पालितानाम् आकर्षणस्य चतुर्णाम् धर्माणामयमस्ति सारः सर्वे बौद्धमताविलम्बिनः एतन्मनसि धारयेयुः न च कदापि विस्मरेयुः।

शीलसंवलितचरित्रं *"सज्जनतायाः वर्तते विशुद्धं मानकम्"*, एते मूलसिद्धान्ताः शीलवतः जीवनमनुशासति। तिब्बतीयेतिहासे बौद्धधर्मस्य चर्मोत्कर्षस्य काले सोङ्ग्त्सान् गेम्पो नाम्ना राज्ञा सत्पुरुषस्य षोडशनिर्देशाः निर्धारिताः, येषु हि त्रिरत्नेषु श्रद्धायाः विकासः, पवित्रधर्मस्यान्वेषणमभ्यासौ, पित्रोः ऋणैःविगतर्णम्, सत्यवादिता, ईर्ष्याभावः इत्यादयः समाविशन्ति।

शीलसंवलितचरित्राणि न केवलं सांसारिकजीवनायैव अपेक्षितानि अपितु तानि प्रबोधितजीवनस्यापि वर्तन्ते दिग्सूचकानि। वर्तमानभूतभविष्यकालिकेभ्यः सर्वेभ्यः बुद्धेभ्यः अस्य शीलसंवलितचरित्रस्य संधारणम् बुद्धत्वप्राप्तेः *सर्वथा योग्यमार्गः* वर्तते। यः कोऽपि बुद्धः स्यात् सः तु बुद्धत्वावाप्तेः प्राक् नूनमेव सत्पुरुषः आसीत्।

वयं यदि तेषां बुद्धानां साक्षात्कारस्य बुद्धत्वप्राप्तेश्च उपलब्धिं न लक्षयामः, तथापि वयं वक्तुं शक्नुमः यत् प्रबुद्धगुरवः स्वप्रतिभायामतीव आकर्षकाः भवन्ति। खेन्पो

सोदर्ग्यवर्येण स्वोपदेशे उक्तं "मया जीवने बहूनां महतां गुरूणां संरक्षणधिगतम्, तेषां गुरूणां वचनानां कर्मणां चाकर्षणं सामान्यजनेभ्यः कल्पनातीतमस्ति। एते श्रेष्ठगुरवः स्वीयशीलसंवलितचरित्रस्य फलस्वरूपं पारे लोकमद्वितीयावस्थां प्राप्तवन्तः"।

शीलसंवलितचरित्राणि *"आकर्षणस्य चतुर्णां धर्माणां सारभूतानि सन्ति"*, तानि सन्ति अधोलिखितानि (1) अन्येभ्यः प्रेम प्रति नेतुं, सत्यप्राप्तये च अन्ये यत्किमपि इच्छन्ति तेभ्यः तत्प्रदानम् (2)पूर्वोक्तलक्ष्यमनुसृत्य तैस्सह प्रियवचोभिसम्भाषणम् (3) पूर्वोक्तलक्ष्यमनुसृत्य अन्येभ्यो लाभप्रदानम् (4) सत्यम् प्रति नेतुं अन्यैः सह सहयोगः अनुकूलानुचरणञ्च। सचेतनानां लाभाय एते चत्वारः बोधिसत्वानां प्रमुखाः नियोगाः वर्तन्ते । एते चत्वारः शीलसंवलिते चरित्रे समाश्रिताः सन्ति। तान् बुद्धत्वप्राप्तिं प्रति नेतुं शीलसंवलितचरित्रवान् अन्येच्छानुकूलं दातुकामः, प्रियं वक्तुकामः , अन्येभो लाभं दातुकामः साहाय्यं प्रदातुकामः अथ च अनुकूलानुचरणञ्च विधातुकामः भवति ।

### b. तदीयपावित्र्यस्य हृद्यः हितोपदेशः

पूर्वोक्त कारणान्यनुसृत्य तदीयपावित्र्येण अयं हृद्यः हितोपदेशः प्रदत्तः। वर्तमाने भविष्ये च, "मम अन्तेवासिनः मयि च श्रद्धावन्तश्च, युष्माभिः सर्वदा शीलसंवलितचरित्रवद्भिर्भाव्यम् । यदि त्वं सत्पुरुषः भवितुं न शक्नोषि चेत् मूलविहीनवृक्षवत् तव अन्याः उपलब्धयः सन्ति निरर्थकाः अथ च ताः न कदापि फलदायिन्यः भविष्यन्ति"।

पुरा सम्पूज्याः कडम्पा गुरवः प्राक्प्रवेशम् आदौ शिष्यस्य चरित्रमवलोकयन्ति स्म। यदि छात्रः सच्चरित्रवान् नास्ति तर्हि गुरवः तं शिष्यत्वेन न स्वीकुर्वन्ति स्म न च धर्मस्य उत्तराधिकारित्वं प्रददति स्म । एतद्विपरीतं यदि कश्चन छात्रः सच्चरित्रवान् भवति स्म परं न पटुः तथापि ते आशान्विताः आसन् यदसौ सुछात्रः स्यात् । तस्माद्धि शीलसंवलितचरित्रं बुद्धिमत्तायाः अपेक्षमस्ति प्रधानतरं तत्त्वम् । शीलसंवलितचरित्रवान् जनः आकर्षको न स्यात्, सुमधुरवाग्युक्तो नापि स्यात् परं तेन दयासंवलितेन हृदयेन भाव्यम् ।

सामान्यतया जनेषु क्षुद्रविषयेष्वपि वैमत्यं दृश्यते । सङ्घस्थभिक्षवः भिक्षुण्यश्च एतां समस्यामनुभवन्ति । महायानानुयायिनः स्युः आहोस्वित् वज्रयानानुयायिनः एतन्निरपेक्ष्य

सङ्घे अनुकूलसमुदायरूपेण उषितव्यमथ च सङ्घे सामञ्जस्यपूर्णं सौहार्दपूर्णं वातावरणं स्यात् । यथा खेम्पो सोदर्ग्यवर्येण कथितम् " एतद्धि शीलसंवलितचरित्रस्याभिव्यक्तिरस्ति" ।

तदीयपावित्र्येण जिग्मे फुन्त्सोक रिम्पोचे वर्येण अस्मिन् भाष्ये चत्वारि सारतत्त्वानि चर्चितानि सन्ति यानि हि महायानवज्रयानयोः शिक्षायाः, बोधिचित्तस्य, त्यागस्य, शीलसंवलितचरित्रस्य च सन्दर्भे अद्वैतप्रज्ञा वर्तते । तदीयपावित्र्येण सैद्धान्तिकाध्ययनेन, निजानुभूत्या च एतानि चत्वारि सारतत्त्वानि उपसंहृतानि सन्ति, एतद्धि चतुरशीतिसहस्रधर्मोपदेशानां सारभूतानि सन्ति ।

# समाप्तिः

समर्पणम्

गीतस्यास्य प्रणयनस्य पूर्वपीठिका

## B1: समर्पणम्

**अहं सर्वेभ्यस्सचेतनप्राणिभ्यो धर्मनिबन्धनमिदं समर्पये,**
**ते च सचेतनप्राणिनः संसारगर्तस्य पारङ्गच्छेयुः।**
**मे प्रियशिष्याः प्रहृष्टास्स्युः,**
**अथ च परमानन्दस्य पवित्रप्रतीच्यां भुवि पुनर्जन्म लभेयुः।**

अस्य भाष्यस्य प्रणयनेन उत्पन्नगुणाः उत्पन्नपुण्यमूलानि च सचेतनेभ्यः याः च सन्ति अस्माकं मातरः ताभ्यः समर्प्यन्ते। ताः संसारस्य भयावहान् अधस्थान् षल्लोकान् सन्तरेयुः। एतानि चत्वारि सारतत्त्वानि उपसंहतानि सन्ति , चतुरशीतिसहस्रधर्मप्रविधीनां सारः उपर्युक्तेषु चतुर्षु सारतत्त्वेषु निहितमस्ति । तदीयपावित्र्ये बौद्धधर्मे च श्रद्धावतां सर्वेषां जनानां हृदये महदानन्दः स्यात् । पवित्रसम्बन्धवन्तः सर्वे सचेतनप्राणिनः पवित्रप्रतीच्यां भुवि पुनर्जन्म लभेयुः, परमानन्दं परमशान्तिञ्च प्राप्नुयुः अथ च स्वजीवने अनेकसचेतनप्राणिनः उपकुर्युः।

## B2: गीतस्यास्य प्रणयनस्य पूर्वपीठिका

*तिब्बतीयपञ्चाङ्गस्य सप्तदशतमे चक्रे आग्नेयमूषकवर्षे गुरुशिष्यैः बाह्याभ्यन्तरप्रच्छन्नावरोधाः प्रत्यादिष्टाः। तस्मिन् पवित्रेऽह्नि नग्वंग लोड्रो त्सुङ्ग्मे इत्यमुना महानुभावेन विजयदिवसः आमानितः अथ च प्रायः पञ्चसहस्रमठजनेषु सद्योविनिर्मितं गीतमिदं प्रस्तुतम् ।*

समग्रे तिब्बतीयपञ्चाङ्गे षष्टिवर्षाणि सन्ति। तिब्बतीयेतिहासस्य कालानुक्रमिकाभिलेखनं १०२७ ईस्वीये प्रारब्धम्। तिब्बतीयपञ्चाङ्गस्य सप्तदशतमे चक्रे आग्नेयमूषकवर्षे (सेप्टेम्बर २१,१९९६) तदीयपावित्र्येण इदं *विजयगीतं* लिखितम्। यथा पूर्वमुल्लिखितं, यदा तदीयपावित्र्यवर्यः बाह्याभ्यन्तरतान्त्रिकावरोधान् उत्क्रम्य स्वशिष्यैः सह हर्षमयपुनर्मिलनम् अकरोत् तदा अस्मिन् विशेषावासरे मठेन मनोरञ्जकवज्रधर्मसभायाः आयोजनं कृतम्, यस्मिन् हि तदीयपावित्र्यस्य रोगस्य, रोगाद्विमुक्तेः समग्रकथा प्रदर्शिता अथ च समादरणीयाभ्यां द्रोम्तोन्पा-जूमिफंरिन्पोचेवर्याभ्यां तस्य आशिषि केचन श्लोकाः पठिताः। नग्वंग लोड्रो त्सुङ्ग्मे इति तदीयपावित्र्यवर्यस्य धार्मिकनाम अस्ति । इत्यमुना महानुभावेन प्रायः पञ्चसहस्रमठजनेषु सद्योविनिर्मितं विजयगीतमिदं प्रस्तुतम् । साधुः! साधुः!



ཡི་གེ་ཉི་ཤུ་རྩ་དྲུག་པ་འདི་དགེ་ཆའི་ནང་དུ་བཞག་ན་དགེ་ཆ་དེ་ཙི་འདྲར་
བགོམས་ཀྱང་ཉེས་པ་མི་འབྱུང་བར་འཇམ་དཔལ་རྩ་རྒྱུད་ལས་གསུངས་སོ།།

For Non-Commercial Use Only